M. T. B. COLLEGE, SURAT

*Manuscripts Library*

No. Ref. / Sec. 708

Title: Vedanta Sara Subodhini Tika

708

सुबोधिनी टीका on वेदान्तसार.

| | | |
|---|---|---|
| Subodhini Tika on | | Title |
| | Vedānta Sāra | Author |
| | | Editor |
| | ~~Sam. 1510 ?~~ | Year, Vols. |
| | | Publisher |
| 708 | | Remarks |

श्रीगणेशाय नमः ॥ श्रीगुरुवरचरणकमलेभ्यो नमः ॥ श्रीवाग्देव्यै नमः ॥ कृष्णानंदं गुरुं नत्वा परमा
नंदमद्वयं ॥ वक्ष्ये वेदांतसारस्य टीकां नाम्ना सुबोधिनीं ॥ १ ॥ इह खलु कश्चिन्महापुरुषो नित्या
ध्ययनविध्यधीतसकलवेदराशीनां चिन्मात्राश्रयतद्रूपाद्वयानंदविषयानाद्यनिर्वचनीयभा
वरूपाज्ञानविलसितानंतभवानुष्ठितकाम्यनिषिद्धवर्जितनित्यनैमित्तिकप्रायश्चित्तोपास
नाकर्मभिः सम्यक्प्रसन्नेश्वराणां निष्टिकाचूर्णादिसंघर्षितादर्शतलवदतिनिर्मलाशया
नां नलिनीदलगतजलबिंदुवद्धिरण्यगर्भादिस्तंबपर्यंतं जीवजातं स्वात्मवन्मृत्योरास्यांत
र्गतं क्षणभंगुरं तापत्रयाग्निसंदह्यमानमनिशमात्मन्यनुपश्यतां ॥ अतिविवेकिनामत
एवैहिकस्रक्चंदनादिविषयभोगेभ्यः आमुष्मिकहैरण्यगर्भाद्यमृतभोगेभ्यश्च वां
ताशनइवातिनिर्विण्णमानसानां शमादिसाधनसंपन्नानामापततोधिगताखि
लवेदार्थत्वाद्देहाद्यहंकारपर्यंतं जडपदार्थतद्विलक्षणस्वप्रकाशस्वरूपप्रत्यगात्म
नि ब्रह्मानंदत्वे संशयोपन्नानां तज्जिज्ञासूनां अल्पश्रवणेन मूलाज्ञाननिवृत्तिप १

रमानंदावाप्तिसिद्धये प्रकरणमारभमाणाः समाप्तिप्रचयगमनादिफलकशिष्टाचा
रपरिप्राप्तेष्टदेवतानमस्काररूपमंगलाचरणस्य अवश्यकर्तव्यतां प्रदर्शय
न् लक्षणया अनुबंधचतुष्टयं निरूपयन् परमात्मानं नमस्कुरुते ॥ अखंडमित्यादिना ॥
अखंडं सच्चिदानंदमवाङ्मनसगोचरं । आत्मानमखिलाधारमाश्रयेभीष्टसि
द्धये ॥ अभीष्टस्य निःश्रेयसस्य सिद्धये प्राप्त्यर्थमात्मानमाश्रये । एकत्वेन प्र
तिपाद्यत इत्यर्थः ॥ नन्वविषयस्यात्मनः कथं प्रतिपत्तिरित्याशंक्याह । अखि
लाधारमिति । अखिलस्य चराचरात्मकप्रपंचस्य विवर्त्ताधिष्ठानत्वेन कारण
त्वात्तं ब्रह्मैव प्रतिपाद्यते । नतु शुद्धमित्यर्थः ॥ नन्वेवं सति प्रतिपत्तिविष
यत्वेन दृश्यत्वापत्तिमाशंक्याह ॥ अवाङ्मनसगोचरं इति । यतो वाचो नि

वे॰ वर्ततइत्यादिश्रुतिभिरविषयत्वप्रतिपादनात्प्रतिपत्तिविषयत्वंकारणत्वो
२ पलक्षितब्रह्मविषयत्वेनौपचारिकमितिभावः एवमपिकारणत्वेमृत्पिंडवदनि
त्यत्वशंकामपहरन्नाह।सदिति॥नाशाभावोपलक्षितस्वरूपंसदेवसौम्ये
त्यादिश्रुतेः।तथापिजडत्वापत्तिमाशंक्याह।चिदिति॥स्वप्रकाशचैतन्यस्व
रूपमितियावत्ननुतथाप्यपुरुषार्थत्वात्किमित्याश्रयणीयमित्यत आह॰
आनंदमिति॰परमानंदरूपमित्यर्थः॥ननुभक्षितेपिलशुनेनशांतोव्याधि
रितिन्यायेनप्रपंचस्याधिष्ठानव्यतिरिक्ततयाप्रतीयमानत्वात्कथमद्वैत २
सिद्धिरित्याशंकांतृणीकुर्वन्नाह।अखंडमिति॰सजातीयविजातीयस्व
गतभेदशून्यमित्यर्थः।अत्रसच्चिदानंदमितिप्रयोजनं।अखंडमितिविष

यः शास्त्रविषययोःप्रतिपाद्यप्रतिपादकभावःसंबंधःतत्कामोधिकारीत्य
नुबंधचतुष्टयमर्थादुक्तंभवति॥किंच॥यस्यदेवेपराभक्तिर्यस्यदेवेतथागुरौ। धा
तस्यैतेकथिताह्यर्थाःप्रकाशंतेमहात्मनइत्यादिश्रुत्यागुरुनमस्कारस्यापि
शास्त्रांगत्वप्रतिपादनात्नमस्कारोपिपृथक्त्वेनकार्यइतितन्नतिपूर्वकमभि
धेयग्रंथंप्रतिजानीते॰ अर्थतोप्यद्वयानंदानतीतद्वैतभानतः गुरूनाराध्य
वेदांतसारंवक्ष्येयथामति॰ अपिशब्देननकेवलंशब्दतः इत्यादिवत्संज्ञात्रं मी
व्यवस्थितमपितुमन्त्रअर्थतः शब्दतश्चेतिअद्वयानंदान्गुरूनाराध्यवे
दांतसारंयथामतिवक्ष्यतइत्यन्वयः अद्वयाश्चतेआनंदाश्चअद्वयानं
दास्तान्अद्वयानंदानतत्रहेतुमाह।अतीतद्वैतभानतइति॰अतीतंगतंद्वै
तभानंयतस्तस्मादतीतद्वैतभानतः निरस्तसमस्तद्वैतभेदज्ञानत्वादित्यर्थः

वे॰ तान्गुरूनाराध्यकायवाङ्मनोभिर्नमस्कारगोचरीकृत्य वेदांतसारं वेदांतसा ता
२ नां उपनिषद्वाक्यजातानां मध्ये यत्सारं सिद्धांतरहस्यं ।यस्मिन्ज्ञाते पुनर्ज्ञातव्यं
नावशिष्यते।तं वेदांतसारं यथामति बुद्धिमनतिक्रम्य वक्ष्ये प्रतिपादयिष्यामि इत्य
र्थः।इदानीं सर्वस्यापि वक्तृविचारोद्देशपूर्वकत्वात्प्रतिज्ञातं वेदांतं नामतो निर्दि
शति।वेदांतो नामोपनिषत्प्रमाणं।तदुपकारीणि शारीरिकसूत्रादीनि च उप
निषद एव प्रामाण्यं उपनिषत्प्रमाणं।उपनिषदो यत्र प्रमाणमिति वा।तदुपका
रीणि वेदांतवाक्यसंग्राहकाणि शारीरकसूत्रादीनि॰ अथातो ब्रह्मजिज्ञा
सा इत्यादीनि सूत्राणि आदिशब्देन भगवद्गीताद्यध्यात्मशास्त्राणि गृह्यं २
ते।तेषामप्युपनिषच्छब्दवाच्यत्वादिति भावः।ननु यद्यपि अवांतरानुबं

धचतुष्टयमापाद्येते निर्दिष्टं तथापि परमानुबंधचतुष्टयस्यानिरूपितत्वादत्र प्रेक्षावतां प्रवृत्ति
र्न स्यादित्यत आह।अस्य वेदांतप्रकरणत्वात्तदीयैरेवानुबंधैस्तद्वत्तासिद्धेर्न तेषां पृथगालोचनी
याः।अस्य वेदांतसारस्येत्यर्थः।ननु वेदांतशास्त्रस्यापि किं।अनुबंधचतुष्टयं येनास्यापि तद्व
त्तासिद्धिरित्याशंक्य मूलशास्त्रस्यानुबंधचतुष्टयमाविष्करोति॰ तत्रानुबंधो नाम॰ अनुबंध
चतुष्टयमेवाह।अधिकारिविषयसंबंधप्रयोजनानि॰ यथोद्देशमधिकारिणं लक्षयति॰
अधिकारी तु विधिवदधीतवेदवेदांगत्वेनापाततोऽधिगताखिलवेदार्थोऽस्मिन्जन्मनि जन्मां
तरे वा काम्यनिषिद्धवर्जनपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखि
लकल्मषतया नितांतनिर्मलस्वांतः साधनचतुष्टयसंपन्नः प्रमाता।स्वाध्यायोऽध्येतव्य
इति वचनात्त्रैवर्णिकानामुपनीतानामध्ययनं नियमेन विधीयते।अध्ययनविधिप्रयुक्त
मेवाध्ययनं नाध्यापनविधिप्रयुक्तं॥तथा च अधीतो वेदो वेदांगानि च शिक्षाकल्प
व्याकरणछंदोज्योतिर्निरुक्ताख्यानि यतस्तेनापाततोऽधिगताखिलवेदार्थः॥अत्र सर्व

वे॰ वेदार्थरहस्ये ज्ञाते सति उत्तरग्रंथवैयर्थ्यपरिहाराय आपाततइत्युक्तं॥ नन्वधीतवेदानामपि
॥४॥ विदुरादीनां तत्वज्ञानोत्पत्तिदर्शनाध्ययनतत्प्रयुक्तकर्मानुष्ठानवैयर्थ्यमाशंक्याह इह वा
जन्मांतर इति। तेषामाधुनिकाध्ययनाद्यभावेपि जन्मांतरीयाध्ययनादिना चित्तपाके परि
वर्ता अस्मिन्जन्मनि विनाप्यध्ययनादिना ज्ञानोत्पत्तौ बाधकाभावान्नाध्ययनादिवैयर्थ्य
मितिभावः॥ ॥काम्येति। काम्यस्यापि कर्मणः धर्मसाधनत्वेपि यातायातसंपादकत्वेन
बंधकत्वान्निषिद्धवत्तद्वर्जनपुरःसरमित्युक्तं। तथाच नित्यादिकर्मानुष्ठानेन निर्गतो निखि
लकल्मषतया निःशेषनिरस्तसकलकल्मषत्वेन। अत्र निखिलपदं काम्यनिषिद्धजनि
तसुकृतदुष्कृतपरं। तेन नितांतनिर्मलस्वांतः नितांतमत्यंतं निर्मलं स्वच्छं स्वांतमंतःकरणं
यस्य सः। तथोक्तः। वक्ष्यमाणसाधनचतुष्टयसंपन्नः प्रमाता। अंतःकरणप्रतिबिंबि
तचैतन्यमित्यर्थः। एतदेव स्पष्टं व्याकरोति काम्यादीनि स्वर्गादिसाधनानि ज्योतिष्टो ष्ट
मादीनि निषिद्धानि नरकाद्यनिष्टसाधनानि ब्राह्मणहननादीनि नित्यान्यकरणे

प्रत्यवायसाधनानि संध्यावंदनादीनि नैमित्तिकानि पुत्रजन्माद्यनुबंधीनि जातेष्ट्यादीनि
प्रायश्चित्तानि पापक्षयसाधनानि चांद्रायणादीनि उपासनानि सगुणब्रह्मविषयमानस
व्यापाररूपाणि शांडिल्यविद्यादीनि। एतेषां नित्यादीनां बुद्धिशुद्धिः परं प्रयोजनं। उपास
नानां तु चित्तैकाग्र्यं तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तप
सानाशकेनेत्यादिश्रुतेः। तपसा कल्मषं हंतीति स्मृतेश्च। नित्यनैमित्तिकप्रायश्चित्तो
पासनानां तु अवांतरफलं पितृलोकसत्यलोकप्राप्तिः। कर्मणा पितृलोको विद्यया
देवलोक इत्यादिश्रुतेः॥ साधनानि नित्यानित्यवस्तुविवेक इहामुत्रार्थफल
श भोगविरागशमदमादिषट्कसंपत्तिमुमुक्षुत्वानि नित्यानित्यवस्तुविवेकस्तावत्
ब्रह्मैव नित्यं वस्तु ततोन्यदखिलमनित्यमिति विवेचनं॥ ऐहिकानां स्रक्चंदनादि
विषयभोगानां कर्मजन्यतया अनित्यवत् आमुष्मिकाणामपि। अमृतादिवि

वे॰ षयस्तेषां नाम नित्यतया तेभ्यो नितरां विरक्तिः इहामुत्रफलभोगविरागः शमद
दां माद्यस्तु शमउपरति तितिक्षासमाधानश्रद्धाख्याः। तत्र शमं लक्षयति शमस्तावच्छ्र
५ वणादिव्यतिरिक्त विषयेभ्यो मनसो निग्रहः यथा तीव्रायां बुभुक्षायां भोजनादन्यो
व्यापारो मनसो न रोचते भोजने विलंबं च न सहते तथास्य श्रद्धाद्विषयेष्वत्यंत
मरुचिः तत्त्वज्ञानसाधनेषु श्रवणमननादिषु अत्यंतमभिरुचिर्जायते। तदा पूर्
ववासनाबलात्श्रवणादिसाधनेभ्यः उड्डीयमानं शब्दादिविषयेषु गम्यमानं म
नः येनांतःकरणवृत्तिविशेषेण निगृह्यते स वृत्तिविशेषः शम इत्यर्थः॥ ॥
इदानीं दमस्य लक्षणमाह॥ दमो बाह्येंद्रियनिग्रहणां तद्व्यतिरिक्तविषये ५
भ्यो निवर्तनं। ज्ञानसाधनश्रवणादिसाधनेभ्यो विलक्षणेषु शब्दादिवि
षयेषु प्रवर्तमानानि श्रोत्रादीनि बाह्येंद्रियाणि येन वृत्तिविशेषेण निवर्तंते स दम इ
त्यर्थः॥ ॥

इदानीमुपरतेर्लक्षणमाह। निवर्तितानां तेषां तद्व्यतिरिक्तविषयेभ्य उपरमणमुपर
तिः निगृहीतानामेव तेषां बाह्येंद्रियाणां श्रवणादिसाधनव्यतिरिक्तेषु शब्दादि
विषयेषु यथा तानींद्रियाणि सर्वथा न गच्छंति तथा तेषां निग्रहो येन वृत्तिविशेषेण
क्रियते सोपरतिरित्यर्थः॥ उपरतेर्लक्षणांतरमाह। अथवा विहितानां कर्मणां वि
धिना परित्यागः विहितानां नित्यादिकर्मणां विधिना चतुर्थाश्रमस्वीकारकर्म
णा परित्यागः नाहं कर्तेत्यवस्थानमुपरतिरित्यर्थः तितिक्षाया लक्षणमाह॥ ति
तिक्षा शीतोष्णादिद्वंद्वसहिष्णुता। शरीरधर्मस्य शीतोष्णादेस्तज्जन्यसुख
दुःखादेश्च शरीरस्यात्यंतुमशक्यत्वात्स्वप्रकाशचिद्रूपे स्वात्मनि च शीतोष्णा
देरत्यंताभावादिति विवेकप्रदीपेन मिथ्याभातस्य शीतोष्णादेर्द्वंद्वस्य यत्सहनं
सा तितिक्षेत्यर्थः। इदानीं समाधानलक्षणमाह॥ निगृहीतस्य मनसः श्र

वे॰ ६ णादौतदनुगुणविषयेषुचसमाधिःसमाधानं॥श्रवणादिविषयेभ्योनिगृहीत
स्यांतःकरणस्यश्रवणादौतदनुगुणेषुतदुपकारकेषुअमानित्वादिसाध
नविषयेषुसमाधिर्नैरंतर्येणतच्चिंतनंसमाधानमित्यर्थः॥श्रद्धाद्वयःस्पष्टार्थाः
गुरुवेदांतवाक्येषुविश्वासःश्रद्धा।मुमुक्षुत्वंमोक्षेच्छा।एवंभूतःप्रमाताधिका
री॰तथाचपूर्वोक्तसकलविशेषणविशिष्टःप्रमाताधिकारीत्यर्थः॥अस्मिन्न
र्थेश्रुतिंप्रमाणयति॰शांतोदांतइत्यादिश्रुतेः।उक्तंच।प्रशांतचित्तायजितेंद्रि
यायप्रहीणदोषाययथोक्तकारिणे।गुणान्वितायानुगतायसर्वदाप्रदे
यमेतत्सततंमुमुक्षवइति॥यथोद्देशंविषयंनिरूपयतिविषयोजीवब्र
ह्मैक्यंशुद्धचैतन्यंप्रमेयं।तत्रैववेदांतानांतात्पर्यात्॥अविद्याध्यारोपितस ६
र्वज्ञत्वकिंचिज्ज्ञत्वादिविरुद्धधर्मपरित्यागेनावशिष्टंशुद्धंचैतन्यंज्ञेयस्व

रूपमेवसर्वेषांवेदांतवाक्यानांविषयइत्यर्थः।क्रमप्राप्तंसंबंधंलक्षयति॥संबं
धस्तुतदैक्यप्रमेयस्यतत्प्रतिपादकोपनिषत्प्रमाणस्यचबोध्यबोधकभावलक्ष
णः बोध्यबोधकभावइतिबोध्यस्यब्रह्मात्मैक्यस्वरूपस्यबोधकस्यवेदांतशा
स्त्रस्यचबोध्यबोधकभावरूपएवसंबंधइत्यर्थः॥अवशिष्टंप्रयोजनमाह।प्रयो
जनंतुतदैक्यप्रमेयगताज्ञाननिवृत्तिःस्वस्वरूपानंदावाप्तिश्चब्रह्मात्मैक
त्वलक्षणचिन्मात्रगताज्ञानतत्कार्यसकलप्रपंचनिवृत्तिःपुनरुत्पत्त्यभावरूपा
स्वस्वरूपानंदप्राप्तिःफलमित्यर्थः॥ननुलोकेप्राप्तस्यक्रियासाध्यस्य
स्वर्गादेःपुरुषार्थत्वेनफलंदृष्टं।अत्रतुनित्यप्राप्तस्यात्मस्वरूपस्यक्रिया
साध्यत्वाभावेनपुरुषार्थत्वाभावात्कथंफलत्वमितिचेन्नतस्यैवपुरुषा
र्थत्वनियमाभावात्यथालोके।कस्यचिद्विस्मृतकंठमणेस्तत्प्रयुक्तशोका

वेदांत·
७

ग्निसंदह्यमानस्य आप्तोपदेशोत्तरकालं स्वकंठगतचामीकरप्राप्तेरपि पुरुषार्थत्वात्फ
लत्वदृष्टेः· एवमत्रापि नित्यप्राप्तस्यात्मन अज्ञानमोहांधकारावृतत्वेन विस्मृतस्वस्व
रूपस्य पुरुषस्य गुरुश्रुतिवाक्यश्रवणानंतरं । अज्ञानमोहांधकारनिवृत्तौ सत्यां
स्वयंप्रकाशमानचिद्रूपस्य सिद्धस्यैवात्मनः फलत्वमुपचर्यत इति भावः । उक्तेर्थे श्रु
तिं प्रमाणयति तरति शोकमात्मवित् ब्रह्मविद्ब्रह्मैव भवत्यादी इति श्रुतेः । अधुना शा
स्त्रारंभनिमित्ताधिकार्यादि निरूपणानंतरं शास्त्रारंभं प्रस्तौति । अथवा लक्षित
स्याधिकारिणः कर्तव्यं दर्शयति· अयमधिकारी जन्ममरणादि संसारानलसं
रा नप्तो दीप्तशिरा जलराशिमिवोपहारपाणिः श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपस
त्य तमनुसरति उक्तलक्षणलक्षितो बुद्धिसंनिहितोधिकारी गुरुमुपसरतीत्यर्थः
ननु संसारासक्तचित्तस्य विषयलोलुपस्यार्त्तिरहितस्य गुरूपसर्पणमत्युक्तमित्याशं
क्याह·

वे॰सा॰ संसारानलसंतप्त इति॰ संतापे हेतुमाह। जननेति॰ आदिशब्देन व्याध्यादयो
८ गृह्यंते। अग्निदग्धमस्तको दाहनिवृत्तिकामो यथा। शीतलं जलराशिम
नुसरति। तथा संसारतापत्रयसंदह्यमानस्तन्निवृत्तिकामः स्वस्वरूपं जिज्ञा
सुः संसारनिवर्तकं श्रोत्रियं ब्रह्मनिष्ठं करतलामलकवत्स्वप्रकाशात्मस्वरू
पसमर्पकं गुरुं समीपं गत्वा अनुसरति वा कायकर्मभिः सेवत इत्यर्थः। अस्मि
न्नर्थे श्रुतिमुदाहरति॰ समित्पाणिः श्रोत्रियमित्यादिश्रुतेः अथ गुरुकृत्य
माह॰ स परमकृपयाध्यारोपापवादन्यायेनैनमुपदिशति स पूर्वोक्तो गुरुरे
नं शिष्यमुपदिशतीत्यन्वयः परमरहस्यमपि ब्रह्मस्वरूपं कस्मादुपदिशतीत्य
त आह॰ कृपयेति॰ कृपाव्यतिरेकेण साधनानंतराभावादित्यर्थः। नन्वखं
डस्य ब्रह्मस्वरूपस्यागोचरत्वेनोपदेष्टुमशक्यत्वात्कथमुपदिशतीत्यत आह॰

अध्यारोपेति॰ अखंडब्रह्मस्वरूपस्य विधिमुखमुपदेष्टुमशक्यत्वेपि नेह ना
नास्ति किंचनेत्यादिश्रुतिमनुसृत्य। अविद्यारोपितमिथ्यानानापदार्थमु
खेनोपलक्षितं। अखंडचैतन्यमेव पुनः। सत्यं ज्ञानमनंतं ब्रह्मेत्यादिश्रुति
मनुसृत्य। लक्षणया विधिमुखेनापि उपदिशतीति भावः। तत्र श्रुतिराह॰
तस्मै स विद्वानुपसन्नाय प्राहेत्यादिश्रुतेः। अस्मिन्नर्थे लौकिकदृष्टांतमा
ह॰ असर्पभूतायां रज्जौ सर्पारोपवद्वस्तुन्यवस्त्वारोपोध्यारोपः। व्यावहा
रिकेवस्तुत्वेनाभिमते रज्जौ अवस्तुभूतसर्पारोपो नाम रज्ज्ववच्छिन्न
चैतन्यस्थतन्नविद्यासर्पज्ञानाभासकारेण परिणममाना सर्पाकारेणावि
व वर्त्तते स विवर्तो रज्ज्ववच्छिन्नचैतन्यनिष्ठाविद्योपादानत्वेन नायं सर्पः
किंतु रज्जुरिति॰ विशेषदर्शनोत्तरकालीनाधिष्ठानरज्जुसाक्षात्कारे

ज्व नं

वे॰ णरज्जुं ज्ञाननिवृत्तौ सर्पभ्रांतिर्निवर्त्तत इत्यर्थः। उक्तमर्थं दार्ष्टांतिके योजयति॰ वस्तु सच्चिन्नंदा
९ द्वयं ब्रह्म कालत्रयानपायि आत्मैव वस्तुशब्दार्थः। तत्रावस्तुस्वरूपमाह। अज्ञानादिसकलज
डसमूहोऽवस्तु। अज्ञानतज्जन्यव्योमादेर्मिथ्यात्वाद् दृश्यत्वात्सावयवत्वादिकारित्वात् सापेक्ष
त्यादि४ सिद्धिकत्वादिहेतुभिरवस्तुत्वमित्यर्थः। एतदेव विस्तरेण प्रतिपादयितुमज्ञानस्वरूपं तावदाह॰ यि
अज्ञानं तु सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किंचिदिति वदंति॰
यं किमिदमज्ञानं सद्रूपमसद्रूपं वा। नाद्यस्तस्य शशविषाणतुल्यत्वेन तुच्छत्वाद् नापि द्विती
यः। असतः कारणत्वानुपपत्तेरित्यादिहेतुभिः सत्वेन असत्वेन वा निरूपयितुं न श
नु क्यत इत्याह॰ अनिर्वचनीयमिति॰ नन्वज्ञानस्यानिर्वचनीयत्वे सर्वथा ज्ञातुमशक्य
त्वात्तदभावप्रसंगमाशंक्याह॰ त्रिगुणात्मकमिति॰ अजामेकामित्यादिश्रुतिभिः ६
सत्वरजस्तमोगुणात्मकत्वप्रतिपादनादित्यर्थः। नन्वेवमजस्याज्ञानस्य श्रुति
प्रसिद्धस्य व्योमादिरूपेण विततस्य सत्यवद्भासमानत्वेन संसारानिवृत्तिमाशंक्याह॰

ज्ञानविरोधीति॰ एतादृशमप्यज्ञानमात्मसाक्षात्कारेण निवर्त्तत इत्यर्थः। तदुक्तं भगवता। दैवी
ह्येषा गुणमयी मम माया दुरत्यया। मामेव ये प्रपद्यंते मायामेतां तरंति ते। इति ज्ञानाभाव एवा
ज्ञानमिति तार्किकमतं निराकरोति॰ भावरूपमिति त्रिगुणात्मकभावरूपत्वेपि इदमित्थमे
वेति पिंडीकृत्य प्रदर्शयितुं न शक्यत इत्याह॰ यत्किंचिदिति॰ किमप्यघटितघटनापटी
य इत्यर्थः। अनिर्वचनीयानादिभावरूपाज्ञानसद्भावे अनुभवमेवोदाहृत्य दर्शयति॰ अ
हम हमज्ञ इत्यनुभवात् अहमज्ञो मामन्यं न जानामीत्यपरोक्षावभास एव प्रमाणमित्यर्थः।
तस्यैवोपष्टंभकत्वेन श्रुतिमुदाहरति॰ देवात्मशक्तिं स्वगुणैर्निगूढामित्यादिश्रुतेः॥
अज्ञानं विभजते तदिदमिति॰ समष्टिव्यष्ट्यभिप्रायेणैकमनेकमिति च व्यवह्रियते।
वस्तुतोऽज्ञानस्यैकत्वेपि समष्ट्यभिप्रायेणैकमिति व्यवह्रियते। व्यष्ट्यभिप्रायेणानेक
मित्यर्थः। एतदेव प्रपंचयितुं प्रतिजानीते॰ तथाहि॰ यथा वृक्षाणां समष्ट्यभिप्रायेण व
नमित्येकत्वव्यपदेशः यथा बहूनां वृक्षाणां समुदायविवक्षया वनमित्यनेकव्यपदे

वे॰ शः। यथावाबहूनांनद्यादिजलानांसमुदायस्यविवक्षयाजलाशयइत्येकत्वव्यपदेशस्तथा
१० तत्करणोपाधिभेदेननानात्वेनप्रतीयमानानांजीवगताज्ञानानांसमुदायविवक्षयाऽज्ञान
मित्येकत्वव्यपदेशइत्यर्थः। अस्मिन्नर्थेश्रुतिप्रमाणमाह। अजामेकामित्यादिश्रुतेः
नानाजीवगतनिकृष्टांतःकरणव्यष्ट्युपाध्यपेक्षयासमष्ट्युपाधेरस्यवैलक्षण्यंदर्श
यति। इयंसमष्टिरुत्कृष्टोपाधितयाविशुद्धसत्वप्रधाना। विगतरागादिदोषसकल
कार्यप्रपंचस्यजगत्कारणभूतस्यअज्ञानस्यसमष्टिभूतोत्कृष्टोपाधित्वेनविशु
द्धसत्वप्राधान्यमितिभावः। यथावाजलानांसमष्ट्यभिप्रायेणजलाशयइतितथा
नानात्वेनप्रतिभासमानजीवगताज्ञानानांसमष्ट्यभिप्रायेणतदेकत्वव्यपदेशः १०
एतत्समष्ट्युपाधिद्वारेणईश्वरचैतन्यंलक्षयति। एतदुपहितंचैतन्यंसर्वज्ञत्वस
नि र्वेश्वरत्वसर्वनियंतृत्वादिगुणकमव्यक्तमंतर्यामीजगत्कारणमीश्वरइतिचव्यपदि
श्यते। एतत्समष्ट्यज्ञानोपलक्षितंचैतन्यंसर्वस्यचराचरात्मकप्रपंचस्यसाक्षित्वेन

नियामक २

सर्वज्ञइत्युच्यते। सर्वेषांजीवानांकर्मानुरूपेशितृत्वेनफलदातृत्वेनेश्वरइत्युच्यते। तथा
त् सर्वेषांजीवानांअंतर्हृदयेस्थित्वाबुद्धिवृत्तिनियामकत्वेनांतर्यामीत्युच्यते। स
र्वस्यचराचरात्मकप्रपंचस्यविवर्ताधिष्ठानत्वेनजगत्कारणत्वमितिव्यपदिश्यतइत्य
।स्मिन्न॰ र्थः। तत्रयुक्तिमाह। सकलाज्ञानावभासकत्वात्। अत्रप्रमाणमाह। यःसर्वज्ञः
सर्वविदितिश्रुतेः। इदानींतस्यैवेश्वरस्यसमुदायोपाधिरेवकारणशरीरत्वमानं
दमयकोशत्वंसुषुप्त्यवस्थावैशिष्ट्यंचलभतइत्याह। ईश्वरस्येयंसमष्टिरखिल
कारणत्वात्कारणशरीरमानंदप्रचुरत्वात्कोशवदाच्छादकत्वाच्चानंदमयःको
शः कारणशरीरत्वेहेतुमाह। अखिलेति। आनंदमयत्वेहेतुमाह। आनंदप्रचुर
त्वादिति। कारणत्वावस्थायांप्रकृतिपुरुषमात्रव्यतिरिक्तस्यस्थूलकार्यप्रपंच
स्येवाभावादानंदबाहुल्यमिति। कोशत्वेयुक्तिमाह। आच्छादकत्वादिति। शरीरा
च्छादकचर्मवदात्माच्छादकत्वादज्ञानस्यकोशइतिव्यवहारइत्यर्थः। सर्वोपरम

वेदां·
११

त्वात्सुषुप्तिः सर्वस्य स्थूलसूक्ष्मोपाधेः कारणोपाधौ लीनत्वात्सुषुप्ति
त्वमित्यर्थः। ननु स्थूलसूक्ष्मप्रपंचलयस्थानस्य कथं सुषुप्तित्वमित्याशं
क्य संज्ञाभेद इत्याह· अत एव स्थूलसूक्ष्मप्रपंचलयस्थानमिति चोच्यते· यतः
कारणात्सुषुप्तित्वं अत एव पंचीकृतभूतस्थूलप्रपंचस्य जाग्रदवस्थाविशिष्टस्य·
अपंचीकृतभूतकार्यस्य सूक्ष्मस्थानप्रपंचस्य लयस्थानमित्यपि व्यवह्रियत इत्यर्थः
समष्टिरूपाज्ञानं सप्रपंचं निरूप्येदानीं व्यष्टिभूतमज्ञानं निरूपयितुं दृष्टांतौ तावद्द
र्शयति· यथा वनस्य व्यष्ट्यभिप्रायेण जलानीति। तथा अज्ञानस्य व्यष्ट्यभिप्रा
येण तदनेकत्वव्यपदेशः यथा बहुवृक्षसमुदायस्य वनत्वेन रूपेणैकत्वव्यवहा
रेपि प्रत्येकवृक्षविवक्षया चूतादयो बहवः वृक्षास्तिष्ठंतीति बहुत्वव्यवहारः ११
यथा वापीकूपतडागादिषु समुदायविवक्षया जलाशय इत्येकत्वव्यवहारेपि
प्रत्येकं वाप्यादिविवक्षया बहूनि जलानि तिष्ठंतीति बहुत्वव्यवहारः तथा स

शि:
स

कलप्रपंचकारणस्याज्ञानस्य समुदायरूपेणैकत्वेपि अहंकारादिकारणीभूतानां
जीवगताज्ञानानां प्रत्येकं विवक्षया बहुत्वव्यवहार इत्यर्थः अस्मिन्नर्थे श्रुतिं प्र
माणयति। इंद्रो मायाभिः पुरुरूप ईयत इत्यादि श्रुतेः। ननु तथाप्येकस्यैवाज्ञानस्य
तदवच्छिन्नचैतन्यं वा व्यष्टिसमष्टिता कुत इत्यत आह। अत्र व्यस्तसमस्तव्यापि
त्वेन व्यष्टिसमष्टिताव्यपदेशः। भेदविवक्षया व्यष्टित्वं मृद्घटादिवत् अभेद
विवक्षया च समष्टित्वं मृत्पिंडवदित्यर्थः। तत्र महाप्रलयकालीनसमष्टि
भूतविशुद्धमूलसत्वप्राधान्यात् मूलप्रकृतेः सकाशाद्द्वैतं दिनप्रलयका
लेन व्यष्ट्युपाधिभूतजीवप्रकृतेर्भेदं दर्शयति· इयं व्यष्टिर्निकृष्टोपाधि
तया मलिनसत्वप्रधाना इयं जीवगता सुषुप्त्यवस्थापन्नाहंकारादिवि
क्षेपसंस्कारादिरूपा निकृष्टोपाधित्वेन मलिनसत्वप्रधानेत्यर्थः। अनेनो

वे॰ पाधिना प्राज्ञचैतन्यं लक्षयति॥ एतदुपहितं चैतन्यमल्पज्ञत्वादनीश्वरत्वादि
१२कं गुणैः प्राज्ञ इत्युच्यते। अत्रोपपत्तिमाह॥ एकाज्ञानावभासकत्वात्। ईश्व
रगतमूलाज्ञानस्य जीवगताहंकारादिविक्षेपसंस्कारादिरूपाज्ञानस्य
वस्तुत एकत्वेन तद्भासकेश्वरजीवचैतन्ययोरप्येकत्वमित्यर्थः सौ
षुप्तजीवचैतन्यस्य प्राज्ञत्वं साधयति॰ अस्य प्राज्ञत्वमस्पष्टोपाधितयाऽन
तिप्रकाशत्वोक्तं दस्यापीयमहंकारादिकारणत्वात्कारणशरीरमानंदप्रचुर
त्वादेव हेतोरानंदमयकोशः संस्काररूपास्पष्टोपाधितया तदावृतत्वेनाति
प्रकाशत्वाभावात्प्राज्ञत्वमस्येत्यर्थः। यथा जगत्कारणेश्वरोपाधेः कार
णशरीरत्वं आनंदप्रचुरत्वेन चानंदमयकोशत्वं कोशदृष्टांतेन च कोशत्वं॰
तथा एतत्सर्वं तारतम्येन प्राज्ञचैतन्येऽप्यतिदिशति। अहंकारादीति॥

स्य कथं सुषुप्तिशब्दवाच्यत्वमित्याशंक्य पूर्ववत्संज्ञाभेदेन वस्तुभेद इति वक्तुं तत्र युक्तिमाह सर्वोपरमत्वात्सुषु
प्तेः। अत एव स्थूलसूक्ष्मशरीरलयस्थानं × ५
प्रलयकाले हिरण्यगर्भादिप्रपंचोत्पादकेश्वरमूलप्रकृतिवत्सुषुप्ति
कालेऽहंकारादिशरीरोत्पादकसंस्कारमात्रावशिष्टजीवगताज्ञानस्या
ईं पि कारणशरीरत्वं इंद्रियतद्विषयाभावेन तथा संगाभावादानंदबाहुल्या
दात्माच्छादकत्वात्कोशत्वं च युक्तमिति भावः। ननु स्थूल स्थूलसूक्ष्मश
रीरलयस्थानमिति चोच्यते पंचीकृतस्थूलशरीरस्य व्यावहारिकस्यापं
चीकृतसूक्ष्मशरीरस्य प्रातिभासिकेऽपि विलोपितत्वात्तस्यापि प्रातिभासि त
कस्य स्वाप्नप्रपंचस्य स्वकारणेऽज्ञाने लीनत्वात्सर्वोपरतिरित्यर्थः। तथा
चोक्तं। लये फेनस्य तद्धर्मा द्रवाद्याः स्युस्तरंगके तस्यापि विलये नीरे ति स्ता
ष्ठंत्येते यथा पुरा। व्यावहारिकजीवस्य लये स्यात्प्रातिभासिके। तल्लये
सच्चिदानंदाः पर्यवस्यंति साक्षिणीति २ ननु प्रलयकाले सुषुप्तिका

वे॰ लेवअंतःकरणतद्वृत्त्यभावेनआनंदस्यावरकाभावात्आनंदप्राचुर्यसद्भा
वेप्रमाणाभावमाशंक्यपरिहरतितदानीमेतावीश्वरप्राज्ञौचैतन्यप्रदी
१३ प्ताभिरतिसूक्ष्माभिरज्ञानवृत्तिभिरानंदमनुभवतः यथास्वच्छत्वेनां
तःकरणस्यवृत्तिरंगीक्रियतेतथाचैतन्यदीप्ताज्ञानस्यापिसूक्ष्मावृ
त्तयःस्वीक्रियंते॥ ॥तथाचेश्वरः॥स्वकीयाज्ञानवृत्तिभिःस्वात्मानं
दबाहुल्यंतारतम्येनानुभवतीतिभावः।अत्रैवोपष्टंभकत्वेश्रुतिमव
तारयति॰आनंदभुक्चेतोमुखःप्राज्ञइत्यादिश्रुतेः।उत्तरकालीन
सुखपरामर्शानुपपत्तिरपिपूर्वानुभूतसुखबाहुल्यानुभवसद्भावेप्र १३
माणमित्याह।सुखमहमस्वाप्संनकिंचिदवेदिषमित्युत्थितस्य
परामर्शोपपत्तेश्चसुखमहमस्वाप्समित्यानंदपरामर्शः।नकिंचि

दवेदिषमितिज्ञानंपरामर्शः।तथाचसुषुप्तिदशायांप्रलयकालेवप्राज्ञेश्व
रावज्ञानवृत्तिभिरानंदमनुभवतःएवेत्यर्थः।इदानीमीश्वरगतमूलाज्ञा
नस्यजीवगतसंस्कारमात्रावशिष्टाज्ञानस्यचसमष्टिव्यष्ट्यभिप्रायेणभेददृष्टा
नेपिवस्तुतोभेदोनास्तीत्येतत्सदृष्टांतमाह।अनयोःसमष्टिव्यष्ट्योःवनवृक्ष
योरिवजलाशयजलयोरिववाअभेदः।उक्तोपाधिद्वयद्वारेणईश्वरप्राज्ञ
योरप्यभेदंदृष्टांतमुखेनदर्शयति॰एतदुपहितयोरीश्वरप्राज्ञयोरपिव
नवृक्षावच्छिन्नाकाशयोरिवजलाशयजलगतप्रतिबिंबाकाशयोरि
ववाभेदःईश्वरस्यवनावच्छिन्नाकाशवत्प्राज्ञस्यवृक्षावच्छिन्नाका
शवत्चतथास्थूलजलाशयोपाध्यवच्छिन्नाकाशवज्जलगतप्रति
बिंबाकाशवच्चकारणोपाध्यवच्छिन्नेश्वरस्यकार्योपाध्यवच्छि

वे· न्नप्राज्ञस्य च वस्तुतो भेद एवेत्यर्थः। तत्र प्रमाणमाह· एष सर्वेश्वर इत्यादिश्रुतेः
१४ तथा चोक्तमाचार्यैः कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः कार्यकारणतां
हित्वा पूर्णबोधोऽवशिष्यत इति· उपाधिद्वयावच्छिन्नौ प्राज्ञेश्वरौ सप्रपंचं निरूप्ये
दानीं अनवच्छिन्नं तु यच्चैतन्यं तल्लक्षयति। वनवृक्षतदवच्छिन्नाकाशयोर्जे
लाशयजलगतप्रतिबिंबाकाशयोर्वा आधारानुपहिताकाशवदनयोर्मू
लाज्ञानसंस्कारमात्रावशिष्टाज्ञानविशिष्टचैतन्ययोरज्ञानतदुपहितचै
तन्ययोराधारभूतं यदनुपहितं चैतन्यं तत्तुरीयमित्युच्यते। यथा स्थूल
वनोपाध्यवच्छिन्नाकाशापेक्षया सूक्ष्मवृक्षोपाध्यवच्छिन्नाकाशापेक्ष १४
व यां महाकाशस्य तदुभयाधारतया अनवच्छिन्नत्वात्तुरीयत्वं तथा का
रणोपाधितदवच्छिन्नचैतन्यद्वयापेक्षया तदाधारभूतं यदनवच्छिन्नं स

र्वव्यापि चैतन्यं विशुद्धं तुरीयमुच्यत इत्यर्थः॥ अस्मिन्नर्थे श्रुतिसंमतिं दर्शयति। शिवम
म द्वैतं चतुर्थं मन्यंत इत्यादिश्रुतेः। एतदेव विशुद्धं चैतन्यं तदेव पूर्वोक्तचैतन्यद्वयेन सहैकत्व १५
विवक्षायां महावाक्यस्य वाच्यत्वं लभते। भेदविवक्षायां च लक्ष्यत्वं लभत इत्याह। इदमेव तु
रीयं शुद्धं चैतन्यमज्ञानादितदुपहितचैतन्याभ्यां तप्तायःपिंडवदविविक्तं सन्महावाक्य
स्य वाच्यं विविक्तं सल्लक्ष्यमिति चोच्यते। त्रयाणां चैतन्यानां चैतन्येन रूपेणैकत्वेपि
अवच्छिन्नानवच्छिन्नत्वेन रूपेण वाच्यलक्ष्यत्वे संभवत इति भावः अथेदानीं स्वप्रका त
शचिद्रूपस्यात्मनः कथं कुंठितप्रकाशत्वं कथं वा असंगोदासीनस्यात्मनः आकाशादि
प्रपंचजनकत्वमित्येतन्महाविरोधपरिहारायाज्ञानस्य शक्तिद्वयं निरूप्यते। अस्याज्ञा
नस्यावरणविक्षेपनामकमस्ति शक्तिद्वयं ते एव नामतो निर्दिशति आवरणशक्ति
स्तावत्स्वचिदानंदस्वरूपमावृणोत्यावरणशक्तिः ब्रह्मादिस्थावरांतं जगज्जलबु
द्बुदवन्नामरूपात्मकं विक्षिपति सृजतीति विक्षेपशक्तिरिति शक्तिद्वयमज्ञानस्य

त्यर्थः। नन्वपरिछिन्नस्यस्वप्रकाशचिद्रूपाखंडपरिपूर्णस्वरूपस्यात्मनःपरिछि
न्नेनानित्येनजडतमोरूपेणाव्यापकेनाज्ञानशक्तिविशेषेणकथमावरणमित्या
शंक्यवक्तव्योज्ञानस्यात्माछादकत्वाभावेपिप्रमातृबुद्धिमात्राछादकत्वेनअ
ज्ञानस्यआत्माछादकत्वमुपचारादुच्यतइत्याह। आवरणशक्तिस्तावदल्पोपिमे
घोनेकयोजनायतमादित्यमंडलमवलोकयितृनयनपथपिधायकतया तु
यथाछादयतीवतथाज्ञानंपरिछिन्नमपिआत्मानमपरिछिन्नमसंसारि
णमवलोकयितृबुद्धिपिधायकतयाछादयती। तादृशंसामर्थ्यं। यथाअ
ल्पोपिमेघोनेकयोजनविस्तीर्णमादित्यमंडलमवलोकयितृपुरुषदृष्टि
मात्राछादकत्वेनात्मानमाछादयतीत्युपचारादुच्यतइत्यर्थः। अस्मिन्नर्थेवृद्ध
सम्मतिमाह॥ ॥तदुक्तं॥ घनछन्नदृष्टिर्घनछन्नमर्कंयथामन्यतेनिष्प्र

भंचातिमूढः॥ तथाबद्धवद्भातियोमूढदृष्टेःसनित्योपलब्धिस्वरूपोहमात्मेति। अन
येवावरणशक्त्यावछिन्नस्यात्मनःकर्तृत्वभोक्तृत्वसुखदुःखमोहात्मकतुछ
संसारसंभावनापिसंभाव्यते। इयमेवावरणशक्तिरात्मनोबुद्धिभेदजनकत्वे
नसंसारहेतुरितिभावः। अत्रानुरूपंदृष्टांतमाह। यथास्वाज्ञानेनावृतायारज्जोः
सर्पत्वसंभावनाँयदुक्तमसंगोदासीनस्यात्मनःकथंजगत्कारणत्वमिति
तन्निराकर्तुंविक्षेपशक्तिस्वरूपमाह। विक्षेपशक्तिस्तुयथारज्ज्वज्ञानंस्वावृ
तरज्जौस्वशक्त्यासर्पादिकमुद्भावयति। एवमज्ञानमपिस्वावृतात्मनिविक्षे
पशक्त्याआकाशादिकंप्रपंचमुद्भावयति। तादृशंसामर्थ्यं। यथारज्जुविष
यकमज्ञानंसर्पमुत्पादयति। तथात्मविषयकमज्ञानमपिस्वावछिन्नेआ
त्मनिविक्षेपशक्तिप्रभावेनआकाशादिप्रपंचमुत्पादयतीत्यर्थः। अस्मिन्न

वे॰ र्थग्रंथांतरसंमतिं दर्शयति॰ तदुक्तं विक्षेपशक्तिलिंगादिब्रह्मांडांतं जगज्जनि॰ ननु किमात्मा
१६ दा चराचरात्मकप्रपंचस्य निमित्तकारणं उपादानकारणं वा नाद्यः दंडादिवत्स्वकार्यव्यापित्वं न स्या
दात्मनः तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुत्या स्वकार्यव्यापित्वश्रवणान्न द्वितीयः । अचेत
नस्य जडस्य प्रपंचस्य चैतन्योपादानकत्वासंभवात् उपादानत्वेन च कार्यकारणयोरभेदेन प्र दा
न्येननिमि पंचस्यापि चैतन्यरूपत्वप्रसंगात् अनित्यत्वं न स्यादित्याशंक्य जडप्रपंचं प्रत्यात्मनः चैतन्यप्रा
त्तत्वं च्या धान्येनोपादानत्वं च संभवतीत्याह । शक्तिद्वयवदज्ञानोपहितं चैतन्यं स्वप्रधानत
ज्ञानप्राधा या निमित्तं स्वोपाधिप्राधान्यतयोपादानं च भवति । यथा अयस्कांतसन्निधाने जडमयं
६ लोहं चेष्टते तथा चैतन्यसन्निधिः जडमयमज्ञानं चेष्टते इत्यज्ञानविकारं प्रति चैतन्यस्य धानेन
निमित्तत्वं जडाकाशादिकार्यं प्रति मायायाः साक्षादुपादानत्वेन मायाविशिष्टस्या
पि परंपरयोपचारादुपादानत्वं न विरुध्यत इत्यर्थः । यदुक्तं चैतन्यस्य निमित्तकारणत्वे १६
कार्यानुप्रवेशो न स्यादिति॰ तन्न॰ कारणस्य कार्यानुप्रवेशनियमस्योपादानकारण
विषयत्वेन निमित्तकारणविषयत्वाभावात् तत्सृष्ट्वेत्यादिश्रुतेरप्युपादानकारणपरत्वात्॰

यदप्युक्तमात्मन उपादानकारणत्वे प्रपंचस्यानित्यत्वं न स्यादिति॰ तदपि न तस्य परिणाम
विषयत्वेन विषयवर्त्तविषयत्वाभावात्॰ प्रपंचस्य ब्रह्मविवर्त्तत्वात् विवर्त्तत्वं च स्वस्वरूपापरि
त्यागेन स्वरूपांतरप्रदर्शकत्वं यथा रज्ज्वच्छिन्नचैतन्यनिष्ठाज्ञानस्य रज्जुस्वरूपापरित्या
गेन आकाशादिस्वरूपांतराकारेण प्रदर्शकत्वं । एतावता आकाशादिप्रपंचस्यापि मिथ्या
त्वात् न चैवमज्ञानस्य मिथ्यात्वेन तत्प्रयुक्तबंधमोक्षयोरपि मिथ्यात्वप्रसंग इति वाच्यं । इ
ष्टापत्तेः । तदुक्तं भागवते । बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः । गुणस्य मायामू
लत्वात् न मे मोक्षो न बंधनमिति॰ अलमतिविस्तरेण । एकस्यैवात्मनो निमित्तोपादा
लूता नकारणत्वे दृष्टांतमाह । यथा मूलातंतुः स्वकार्यं प्रति स्वप्रधानतया निमित्तं स्वशरीर
प्रधानतयोपादानं च भवति॰ यथा लूतातंतुः स्वोत्पाद्यमानतंतुलक्षणं कार्यं प्रति
स्वचैतन्यप्रधानतया निमित्तं चैतन्यसन्निधानव्यतिरेकेण जडस्य देहस्य मृतशरीर
क वत्तंतुजनकत्वासंभवात् स्वशरीरप्राधान्येन उपादानं च भवति॰ शरीरस्य साक्षात्तंतु

वे॰ पादानत्वेनतदवच्छिन्नचैतन्यस्याप्युपादानत्वेनोपचारात्।एवमीश्वरस्यापिस्वचैतन्य
१८ प्रधानतयानिमित्तत्वंस्वोपाधिप्रधानतयोपादानत्वंचभवतीत्यर्थः।इदानींविक्षेप
शक्तिकृत्यमाह॰तमःप्रधानविक्षेपशक्तिमदज्ञानोपहितचैतन्यादाकाशःआका
शाद्वायुःवायोरग्निःअग्नेरापःअद्भ्यःपृथिवीचोत्पद्यतेआकाशादेर्जडत्वात्तमोगुण
प्रधानविक्षेपशक्तियुक्ताज्ञानावच्छिन्नचैतन्यस्यैवाकाशादिप्रपंचजनकत्वमितिभावः शा
अस्मिन्नर्थेश्रुतिंप्रमाणयति॰एतस्मादात्मनःआकाशःसंभूतइतिश्रुतेः।ए
तेनार्थात्सांख्यनैयायिकपक्षौनिरस्तौशक्तेरज्ञानस्यशक्तिमत्परतंत्रत्वात्स्वतं
त्रस्यतस्यकेवलस्यजडस्याज्ञानस्यजगत्कारणत्वानुपपत्तेः।ईक्षतेर्नाशब्दंरचना
नुपपत्तेश्चनानुमानमित्यादिन्यायनिरस्तत्वाच्च।परमाणोरप्युक्तदोषग्रासा
च्चासानपायात्।अभिन्ननिमित्तोपादानप्रतिपादकश्रुतिस्मृतिन्यायविरोधाच्च। १८
यतोवाइमानिभूतानिजायंतेयेनजातानिजीवंति।यत्प्रयंत्यभिसंविशंति॥स

देवसौम्येदमग्रआसीत्॰एतस्माज्जायतेप्राणोमनःसर्वेंद्रियाणिच।अहंसर्वस्य
प्रभवोमत्तःसर्वंप्रवर्तते।बीजंमांसर्वभूतानामित्यादिश्रुतिस्मृतिभिरीश्वरस्यै
वजगत्कारणत्वप्रतिपादनात्॰नन्वाकाशादिप्रपंचोत्पादकचैतन्यावच्छेदकाज्ञा
नेकुतस्तमःप्राधान्यमित्याशंक्याह॰तेषुजाड्यादिदर्शनात्तमःप्राधान्यंतत्कारण धिक्य
स्यकारणगुणाहिकार्यगुणानारंभंतइतिन्यायादितिभावः।ननुत्रिगुणात्मकत्वा
दज्ञानस्यकथंतमोगुणमात्रप्राधान्येनआकाशादिजनकत्वमित्याशंक्याह॰इदा
नींसत्वरजस्तमांसिकारणगुणप्रक्रमेणतेष्वाकाशादिषूत्पद्यंतेतदानीमुत्पत्ति
वेलायांसत्वादयस्त्रयोपिगुणास्तारतम्येनकारणप्रक्रमन्यायेनतेष्वाकाशादिषुपं
चभूतेषूत्तरोत्तराधिक्येनजायंतइत्यर्थः।इमान्येवसूक्ष्मशरीरादिकारणभूतापंची
कृतानिसूक्ष्मरूपपंचभूततन्मात्राणीत्युच्यंते॰इत्याह।तान्येवसूक्ष्मभूतानितन्मा
त्राण्यपंचीकृतानिचोच्यंते।तदुक्तं।पंचप्राणामनोबुद्धिर्दशेंद्रियसमन्वितं।अ

वे॰ पंचीकृतभूतोत्थं सूक्ष्मांगं भोगसाधनमिति वचनादपि ।अपंचीकृतभूतेभ्यो पंचीकृत
१८ सूक्ष्मशरीराणि पंचीकृतस्थूलभूतेभ्यः स्थूलशरीराणि चोत्पद्यंते इत्याह ।एतेभ्यः सूक्ष्म
शरीराणि स्थूलभूतानि चोत्पद्यंते ।सूक्ष्मशरीरस्वरूपभूतानवयवानाह ।अवयवास्तु
ज्ञानेंद्रियपंचकं बुद्धिमनसी कर्मेंद्रियपंचकं वायुपंचकं चेति॰ ज्ञानेंद्रियाणि श्रोत्रत्व
क्चक्षुर्जिह्वाघ्राणाख्यानि सात्विकांशादाकाशाच्छ्रोत्रमुत्पद्यते ।सात्विकांशाद्वायोस्त्वगिंद्रि
यं ।सात्विकांशात्तेजसश्चक्षुः सात्विकांशाज्जलाज्जिह्वा सात्विकांशाच्च पृथिव्याः सकाशाद्घ्राणें
द्रियं चेति क्रमेणोत्पद्यंते इत्याह ।एतान्याकाशादीनां सात्विकांशेभ्यो व्यस्तेभ्यः पृथक्पृथक् क्रमेणो
म त्पद्यंते बुद्धेर्लक्षणमाह ।बुद्धिर्नाम निश्चयात्मिकांतःकरणवृत्तिः अहमेवाहमिति निश्चयात्मिकैवांतश्च
करणवृत्तिरेव बुद्धिरित्यर्थः ।मनसो लक्षणमाह॰ मनो नाम संकल्पविकल्पात्मिकांतश्च करणवृत्तिः
अहं विद्रूपो देहो वेति संशयात्मिकांतःकरणवृत्तिः अहं विद्रूपो देहो वेति संशयात्मिकांतःकरण
वृत्तिरेव मन इत्यर्थः ॥स्मरणात्मकं चित्तस्य गर्वात्मकाहंकारस्य च बुद्धिमनसोरंतर्भाव इत्याह॰ १८
अनयोरेव चित्ताहंकारयोरंतर्भावः यद्यप्यंतःकरणत्वेन चतुर्णामिकत्वं तथाप्येकस्यैव पुरुषस्य

भक्रियमपि भोक्तृत्वकर्तृत्वदुःखित्वपरिछिन्नत्व

पाचकः पाठक इत्यादिवृत्तिभेदाद्भेदकदेकस्याप्यंतःकरणस्य निश्चयसंशयस्मरणाहंकार
दृ विषयभेदैर्बुध्यादिभेदमित्यर्थः ।बुध्यादीनामुत्पत्तिप्रकारं दर्शयति॰ एते पुनराकाशादिगतसा
त्विकांशेभ्यो मिलितेभ्य उत्पद्यंते ।एतेषां चतुर्णां सात्विकांशेभ्यो भूतेभ्य उत्पत्तौ निमित्तमाह ॥
एतेषां प्रकाशात्मकत्वात्सात्विकांशकार्यत्वं बुध्यादीनां प्रकाशात्मकत्वात्सात्विकांशभूतकार्यत्व
मित्यर्थः बुद्धेर्विज्ञानमयकोशत्वं दर्शयति ।इयं बुद्धिर्ज्ञानेंद्रियैः सहिता विज्ञानमयकोशो भवति॰
बुद्धेः सत्वकार्यत्वात ज्ञानेंद्रियसाहित्येन प्रकाशाधिक्याद्धि ज्ञानमयत्वं ।आत्माच्छादकत्वाच्च को
शत्वमित्यर्थः ।विशुद्धबुद्धिप्रतिबिंबितचिदात्मजीवनो जीवत्वं दर्शयति॰ अयं कर्तृत्वभोक्तृत्वसु
खित्वदुःखित्वाद्यभिमानित्वेन इह परलोकगामी व्यावहारिकजीव इत्युच्यते ।तस्यायं पिंडव
बुध्यारोपितं चैतन्यं वस्तुतो कर्तृभोक्तृ नित्यानंदापरिछिन्नं क्रियावत्वाद्यभिमानेन स्वर्गा
दिलोकांतरगामित्व व्यावहारिकजीवत्वं च लभत इत्यर्थः ।मनोमयकोशं निरूपयति॰ मन
स्तु कर्मेंद्रियैश्च सहितं सन्मनोमयकोशो भवति ।सत्वगुणप्रधानं मनश्च सत्वगुणांशेभ्यो जात
श्रोत्रादिज्ञानेंद्रियैरेव सहितं सन्मनोमयकोश इत्यर्थः अत्र तु मनसः सत्वोपहितरजोवि
कारेच्छारूपत्वात्संकल्पविकल्पात्मकत्वेन बुध्यपेक्षया जाड्याधिक्यान्मनोमयत्वं आत्मा

[illegible]

१६

छादकत्वा त्कोशात्वमितिभावः कर्मेंद्रियाण्युद्दिशति कर्मेंद्रियाणिवाक्पाणिपादपा
यूपस्थाख्यानि। एतेषामुत्पत्तौसाधनापेक्षायामाह। एतानिपुनराकाशादीनांरजोंशेभ्यो
भूतेभ्यः पृथक्पृथक्क्रमेणोत्पद्यंते। भूतानांत्रिगुणत्वेनैपिरजोगुणाबहुलेभ्यो भूतेभ्यो
वागादीनिपृथक्पृथक्क्रमेणजायंते। रजोगुणप्रधानादाकाशाद्वागुत्पद्यतेरजोगुणप्र
धानाद्वायोः प्राणींद्रियंरजोगुणप्रधानादग्नेः पादेंद्रियंरजोगुणप्रधानाज्जलात्पायिं
द्रियंरजोगुणप्रधानायापृथिव्याः। गुह्येंद्रियमुद्यतइत्यर्थः। वायूनुद्दिशतिवायवः गा
प्राणापानव्यानोदानसमानाः यथोद्देशंप्राणस्यलक्षणामाह• प्राणोनामप्राग्गमनन
वान्नासाग्रस्थानवर्तीऊर्ध्वगमनशीलोनासाग्रस्थायीवायुःप्राणइत्यर्थः। अ
पानस्यलक्षणमाह। अपानोनामअवागाननवान्पाय्वादिस्थानवर्तीअधो
गमनशीलःपाय्वादिस्थायीवायुरपानइत्यर्थः। व्यानस्यलक्षणामाह• व्यानो
घ नामविष्वग्गमनवानखिलशरीरवर्तीस्थायीवायुर्व्यानइत्यर्थः। उदानस्यलक्ष
णामाह• उदानोनामकंठस्थानीयऊर्ध्वगमनवानुत्क्रमणवायुःऊर्ध्वमुत्क्रमणा

वे॰ शीलः कंठस्थायीवायुरुदान इत्यर्थः ॥ समानोनामशरीरमध्यगतअशितपीतान्नादि
२० समीकरणकरः शरीरमध्यगतान्नरसादिनेतावायुः समान इत्यर्थः । प्राणादीनांवा
युत्वेनतूपयोक्त्वेपिक्रियाभेदेनभेद इत्यर्थः ॥ कापिलमतानुसारिणः ॥ क्रियाभेदे
ती नान्येपिपंचवायवः ॥ संतीतिवदंस्याह॰ केचित्तुनागकूर्मकृकलदेवदत्तधनंजयाख्याः
पंचान्येवायवः संतीतिवदंतितान्येवनामानिनिर्दिशंति॰ नागेत्यादिनागउद्गिरण
करः कूर्मउन्मीलनक [illegible] रः ॥ कृकलःक्षुत्करः ॥ देवदत्तोजृंभणाकरः ॥ धनंजयः ॥
पोषणकरः ॥ ॥ तथाचो [illegible] क्तं ॥ उद्गारेनागआख्यातः ॥ कूर्मउन्मीलनेस्मृतः ॥ कृ
कृत कलःक्षुतिज्ञेयोदेवदत्तोविजृंभणेनजहातिमृतंचापिसर्वव्यापीधनंजय इति॰
वेदांतिनस्तुनागादीनांप्राणादिष्वंतर्भावंवदंतीत्याह॰ एतेषांप्राणादिष्वंतर्भा
वात्प्राणादयः पंचैवेतिकेचित्प्राणादिवायूनामुत्पत्तौकारणापेक्षायामाह॰ ए २० पंच
वंप्राणादिपंचकंआकाशादिगतरजोंशेभ्योमिलितेभ्यउत्पद्यते पंचीकृतमहाभू
भ्यः तेभ्यः रजःप्राधान्येकैः ॥ प्राणादयोजायंत इत्यर्थः । एतेषांप्राणादीनांप्राणप्रचुर

मनोमयइच्छाशक्तिमान्करणरूपः । प्राणमयः क्रि ८
याशक्तिमान्कार्यरूपः ॥ ८

त्वात्प्राणमयत्वंआत्माच्छादकत्वात्कोशत्वंचभवतीत्याह । इदंप्राणादिपंचकंकर्मेंद्रि
यैः सहितंसत्प्राणमयकोशोभवति॰ प्राणादीनांरजःप्रधानतकार्यत्वेनिमित्तमाह ॥
अस्यक्रियात्मकत्वेनरजोंशकार्यत्वंप्राणादीनांक्रियात्मकत्वाद्रजः कार्यत्वमित्य
र्थः । एतेषुपंचसुकोशेषुमध्येविज्ञानमयमनोमयप्राणमयकोशानांक्रमेणज्ञा
नेच्छाक्रियाशक्तिभेदेनकर्तृकरणक्रियारूपत्वंदर्शयति॰ एतेषुकोशेषुमध्ये
विज्ञानमध्ययोज्ञानशक्तिमान्कर्तृरूपः तत्रहेतुमाह॰ योग्यत्वादेवमेतेषांवि
भागइतिवर्णयति इदमेवकोशत्रयंसूक्ष्मशरीरमितिव्यवह्रियत इत्याह॰
एतत्कोशत्रयंमिलितंसत्सूक्ष्मशरीरमुच्यते । अस्यसमष्टित्वेहेतुमाह॰ अत्रा
प्यखिलसूक्ष्मशरीरमेकबुद्धिविषयतयावनवज्जलाशयवद्वासमष्टिः एक
ति बुद्धिचराचरप्राणिमात्रस्ययावंत्यनंतानिसूक्ष्मशरीराणितेषांसर्वेषां
८॰ सूक्ष्मशरीराणांसूत्रात्मनाहिरण्यगर्भत्वेनरूची येकबुध्याविषयीकृत

वेदां॰ २१ ष्य

त्वात् समष्टित्वमित्यर्थः। तत्र दृष्टांतमाह। वनवदित्यादि। अस्यैव सूक्ष्मशरीरस्य व्यष्टित्वं दर्श
यति। अनेकबुद्धिविषयतया वृक्षवज्जलवद्वा व्यष्टिरपि भवति। अनेकेषां जीवानां प्रत्येकस्य
स्वलिंगशरीरस्य स्वस्वबुद्धिविषयत्वेनानेकबुद्धिविषयत्वं तया व्यष्टित्वमित्यर्थः। तत्र
दृष्टांतमाह। वृक्षवदित्यादि। उक्तसमष्ट्यवच्छिन्नचैतन्यस्य सूत्रात्मत्वादिसंज्ञां दर्शय
ति। एतत्समष्ट्युपहितं चैतन्यं सूत्रात्मा हिरण्यगर्भः प्राणश्चेत्युच्यते। तत्र हेतुमाह।
सर्वात्रानुस्यूतत्वादित्यर्थः। हेत्वंतरमाह। ज्ञानेच्छाशक्तिमत्कोशत्रयोपाध्यवच्छिन्न
त्वादित्यर्थः। विज्ञानमयादिकोशत्रयस्य सूक्ष्मशरीरत्वं दर्शयति। अस्यैषा समष्टिः
स्थूलप्रपंचापेक्षया सूक्ष्मत्वात् सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं। अस्य सूत्रात्म
हिरण्यगर्भाख्यस्य विज्ञानमयादिकोशत्रयं सूक्ष्मशरीरं। अस्य स्थूलप्रपंचापेक्ष
या सूक्ष्मत्वादित्यर्थः। अस्यैव विज्ञानमयादिकोशत्रयस्य स्वप्नत्वे युक्तिमाह। जाग्र २१
द्वासनामयत्वात् स्वप्नः। विराट्स्वरूपेणानुभूतस्थूलप्रपंचविषयकवासनामयत्वात्

सूक्ष्मत्वं

स्वप्नत्वमस्येत्यर्थः। अत एव स्थूलप्रपंचलयस्थानमिति चोच्यते। यतः स्वप्नत्वं च अत एव स्थू
लप्रपंचलयस्थानमित्युच्यत इत्यर्थः। विज्ञानमयादिसमष्ट्युपाध्यवच्छिन्नचैतन्यस्य हिर चैतन्यं
त ण्यगर्भत्वं प्रतिपाद्येदानीं तद्व्यष्ट्युपलक्षितचैतन्यस्य तैजसत्वं निरूपयति। एतद्व्यष्ट्युपहितं तैजसो
भवति। तत्र हेतुमाह। तेजोमयांतःकरणोपहितत्वात्। अस्यापीयं व्यष्टिः स्थूलशरीरापेक्षया सूक्ष्म
त्वादिति हेतोः सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं व्यष्टिरूपं विज्ञानमयादिकोशत्रयं
तैजसस्यापि सूक्ष्मशरीरमिति दर्शयति। अस्यापि इति सूक्ष्मशरीरत्वे हेतुमाह। स्थूलेति।
अस्यापि स्वप्नत्वे हेतुमाह। जाग्रद्वासनामयत्वात् स्वप्नः। विश्वचैतन्येनानुभूतस्थूलशरीर
विषयकवासनामयत्वात् स्वप्नत्वमित्यर्थः। अस्यैव सूक्ष्मशरीरस्य स्थूलशरीरलयस्था
नत्वे युक्तिमाह। जाग्रद्वासनामयत्वात् स्थूलशरीरलयमिति स्थानं चोच्यते। यथा प्र
या वेशात्मश्वरावज्ञान। वृत्तिभिः सूक्ष्मस्थूलव्यवस्थामानं दमनुभवतः तथा हिरण्यगर्भतैज
सावपि स्वप्नावस्थायां मनोवृत्तिभिर्वासनामयान् शब्दादिविषयाननुभवत इति
दर्शयति। एतौ सूत्रात्मतैजसौ तदानीं मनोवृत्तिभिः सूक्ष्मविषयाननुभवतस्त्विन्नर्थे

ल

२२ श्रुतिमुदाहरति॰प्रविविक्तभुक्तैजस इत्यादिश्रुतेः।इहापि विज्ञानमयादिकोशत्रय ति
तैजस स्यसमष्टिरूपस्यतदनवच्छिन्नसूत्रात्मनश्च व्यष्टिरूपज्ञानमयादिकोशत्रयस्यतदव
च्छिन्नतैजसस्य च वनवृक्षावच्छिन्नाकाशादिदृष्टांतमुखेनाभेदं दर्शयति।अत्रापि
समष्टिव्यष्ट्योस्तदुपहितसूत्रात्मतैजसयोर्वनवृक्षवत्तदवच्छिन्नाकाशवज्जलाशयज घ्
लवत्तद्गतप्रतिबिंबाकाशवच्चाभेदः समष्टिव्यष्टिरूपाध्योर्वनवृक्षजलाशयजलवच्चा
भेदः।उपाधिद्वयावच्छिन्नचैतन्ययोः सूत्रात्मतैजसयोरपि वनवृक्षावच्छिन्नाकाशव
ज्जलाशय।जलगतप्रतिबिंबाकाशवच्चाभेद इत्यर्थः।सूक्ष्मशरीरोत्पत्तिप्रकरणमु
पसंहरति॰एवं सूक्ष्मशरीरोत्पत्तिः अथेदानीं स्थूलशरीरोत्पत्तिं निरूपयितुमुपक्रमते॰
स्थूलभूतानि तु पंचीकृतानि तु शब्दः पूर्वस्माद्वैलक्षण्यं द्योतयति पंचीकृतानीति।अपंचीकृतसू क्र
क्ष्मभूतापेक्षया स्थूलभूतानि पंचीकृतानीत्यर्थः।पंचीकरणमेव प्रतिपादयितुं प्रतिजानीते॰
पंचीकरणं तु पंचीकरणप्रकारमेवाह।आकाशादिपंचकस्य एकैकं द्विधा समं विभज्य तेषां
चतुर्णां भागानां स्वस्वद्वितीयार्धभागपरित्यागेन भागांतरेषु योजनं।अयमर्थः सृष्टिकाले
२तेषु दशसु भागेषु प्राथमिकान्पंचभागान्प्रत्येकं चतुर्धा समं विभज्य२

सकलप्राण्यदृष्टवशादीश्वरप्रेरणया आकाशवायुतेजोऽबन्नाद्यविद्यासहायभूतात्परमात्म य
तानि नः सकाशादनुक्रमजातानि अपंचीकृतभूतानि सूक्ष्माणि व्यवहारासमर्थानीति कृत्वा तानी
स्थौल्यापेक्षायां व्यवहर्तृप्राणिजातधर्माधर्मापेक्षयैव तान्येव भूतानि पंचीकृतभूतानि
भवंति तानि च प्रत्येकं द्वैविध्यमापद्यंते।तेष्वाकाशादिषु दशसु भागेषु प्राथमिकान्पं
चभागान्प्रत्येकं चतुर्धा समं विभज्य स्वार्धपरित्यागेन चतुर्णां प्रत्येकं भागांतरेषु सन्निवे
नि शेन पंचीकृतानि स्थूलानि भवंतीति॰अस्मिन्नर्थे वृद्धसंमतिमाह।तदुक्तं।द्विधा विधाय
चैकैकं चतुर्धा प्रथमं पुनः स्वस्वेतरपंचपंच द्वितीयांशैर्योजने पंचपंचते इति॰पंचीकरणस्य चै
त्रिवृत्करणप्रतिपादकश्रुत्यंतरविरोधमाशंक्य परिहरति॰अस्याप्रमाण्यं न शंकनीयं
त्रिवृत्करणमिति श्रुतेः।पंचीकरणस्याप्युपलक्षणत्वात् भूतत्रयसृष्टिस्थितौ सृष्टि
परिहृत्यर्थे।अन्यत्र श्रुतमपि भूतद्वयमाश्रित्य भूतपंचकाभिप्रायेण भूतत्रयसृष्टि
प्रतिपादनाद्विरोध इत्यर्थः।आकाशादिपंचभूतेषु चतुर्धा विभक्तानामन्येषां पंचभू
तानां प्रत्येकानुप्रवेशेन पंचीकृतानामाकाशादीनां पंचात्मकत्वाविशेषादाकाशा

वे० दिव्यपदेशो न संभवति। स्यादिति। आशंक्य परिहरति। पंचानां पंचात्मकत्वे समानेपि तेषु
२३ वैशेष्यात्तद्वादस्तद्वाद इति न्यायेन आकाशादिव्यपदेशः संभवति। आका
शादीनां पंचानां पंचात्मकत्वे समानेपि तेषु पंचभूतेषु तद्विशेषानुप्रवेशात् तन्नामभि
र्व्यवहारः संभवतीत्यर्थः। तदानीमाकाशे शब्दोभिव्यज्यते। यदा पंचीकृतान्याकाशा
दीनि तदानीं स्थूलत्वेन स्वस्वकार्योत्पादनासमर्थत्वादाकाशे अव्यक्तरूपेण स्थि
तः। शब्दोभिव्यज्यते। अभिव्यक्तो भवतीत्यर्थः। वायौ शब्दस्पर्शौ। अग्नौ शब्दस्पर्शरू
पाणि। अप्सु शब्दस्पर्शरूपरसाः। पृथिव्यां शब्दस्पर्शरूपरसगंधाश्च। उक्तेभ्यो भू
रं तेभ्यश्चतुर्दशभुवनोत्पत्तिप्रकारं दर्शयति। एतेभ्यः पंचीकृतेभ्यो भूतेभ्यः भूर्भुवः
स्वः महः जनः तपः सत्यं इत्येतन्नामकादीनामुपर्युपरि विद्यमानानामतलपाता
लवितलसुतलरसातलतलातलमहातलानां अनेकानामधोधो विद्यमानानां
लोकानां ब्रह्मांडस्य चतुर्विधस्थूलशरीराणां तदुचितानामन्नपानादीनां चोत्पत्ति
र्भवति। एतेभ्यो भूतेभ्यः समुत्पन्नब्रह्मांडस्य चतुर्विधशरीराणां च तद्योग्यान्नपाना
दीनां चोत्पत्तिर्भवतीत्यर्थः। चतुर्विधशरीराण्युद्दिशति चतुर्विधशरीराणि तु। जरा

युजांडजोद्भिज्जस्वेदजाख्यानि तानि च यथोद्देशं विवृणोति। जरायुभ्यो जातानि मनुष्यप
श्वादीनि। अंडजानि अंडेभ्यो जातानि च पक्षिपन्नगादीनि। उद्भिज्जानि भूमिमुद्भि
द्य जातानि कक्षवृक्षादीनि। स्वेदजानि स्वेदेभ्यो जातानि यूकमशकादीनि। पूर्ववदत्रा
पि समष्टिव्यष्टिभेदं दर्शयति। अत्रापि चतुर्विधसकलस्थूलशरीरमेकानेकबुद्धिवि
षयतया वनवज्जलाशयवद्वा समष्टिः वृक्षवज्जलवद्वा व्यष्टिरपि भवति। चतुर्वि
धशरीरजातमपि शरीरमित्येकबुद्धिविषयतया वनवत्समष्टित्वं प्रत्येकं तच्छरीर
विषयतयानेकबुद्धिविषयत्वाद्व्यष्टित्वं च लभत इत्यर्थः। अधुना भूरादिचतुर्द
शभुवनांतर्गतचतुर्विधस्थूलशरीरसमष्ट्युपहितचैतन्यस्य वैश्वानरत्वापरप
र्यायं वैराजत्वं दर्शयति। एतत्समष्ट्युपहितं चैतन्यं वैश्वानरो विराडित्युच्यते॥ तत्र
युक्तिमाह। सर्वनराभिमानित्वाद्विविधं राजमानत्वाच्च। सर्वप्राणिनिकाये अह
वं मित्यभिमानित्वाद्वैश्वानरत्वं विविधं नानाप्रकारेण प्रकाशमानत्वाच्च। नत्वाच्च।
वैराजत्वं लभत इत्यर्थः। अस्यैषा समष्टिः स्थूलशरीरं अस्य विराट्चैतन्य

वे. २४

स्य एषामप्येकाया ब्रह्माण्डान्तर्गत चतुर्विधस्थूलशरीरसमष्टिरेव स्थूलशरीरमित्यर्थः
अन्नविकारत्वादन्नमयकोशः स्थूलभोगायतनत्वाच्च। स्थूलशरीरं नामाच्यते निव्य
पदिश्यते। अन्नविकारबाहुल्यादन्नमयत्वं आत्माच्छादकत्वात्कोशत्वं स्थूल
शरीरादिविषयप्रयुक्तसुखदुःखभोगायतनत्वाच्च। स्थूलशरीरत्वं इंद्रियैर
र्थोपलंभश्च जाग्रदवस्थात्वं च घटत इत्यर्थः। चतुर्विधस्थूलशरीरं समष्ट्युपहि
तचैतन्यमप्रपंचमभिधाय इदानीं तद्व्यष्ट्युपहितं चैतन्यं विश्व इत्युच्यते। एतेषां च ३
चतुर्विधशरीराणां या व्यष्टिस्तत्तच्छरीरव्यक्तिस्तदुपहितं चैतन्यं विश्व इत्युच्यते
इति भर्थः। अत्र हेतुमाह। सूक्ष्मशरीराभिमानं परित्यज्य स्थूलशरीरादिप्रवि
ष्टत्वात्॥ ॥सूक्ष्मलिंगशरीराभिमानं परित्यज्य स्थूलशरीरेषु प्रविश्य तत्तत्स्थू
लशरीरेषु सर्वेष्वपि प्रत्येकमहमहमित्यभिमानवत्वाद्विश्व इत्यर्थः। अस्या ६
प्येषा व्यष्टिः स्थूलशरीरं अस्य चैतन्यस्याप्येषा तत्तच्छरीरव्यक्तिविशेषलक्ष
णा व्यष्टिः सैव स्थूलशरीरमित्यर्थः। अत्राप्यन्नविकारबाहुल्यादन्नम

यत्वं चैतन्याच्छादकत्वात्कोशत्वमिंद्रियैरर्थोपलंभाज्जाग्रत्त्वं च क्रमेण दर्शय
ति। अन्नविकारत्वादेव हेतोरन्नमयकोशः जाग्रदित्युच्यते। अधुना जाग्र
दवस्थायां विश्ववैश्वानरयोस्तत्तद्देवताधिष्ठितश्रोत्रादिभिश्चतुर्दशभिः क
रणैः शब्दादिविषयग्रहणप्रकारं दर्शयति। तदानीमेतौ विश्ववैश्वानरौ दि
ग्वातार्कवरुणाश्विभिः क्रमान्नियंत्रितेन श्रोत्रादींद्रियपंचकेन क्रमाच्छब्द
स्पर्शरूपरसगंधान् अग्नींद्रोपेंद्रयमप्रजापतिभिः क्रमान्नियंत्रितेन वा
गादींद्रियपंचकेन क्रमाद्वचनादानगमनविसर्गानंदादीन् चंद्रचतुर्मुख
शंकराच्युतैः क्रमान्नियंत्रितेन मनोबुध्यहंकारचित्ताख्येनांतरिंद्रिय
चतुष्केण क्रमात्संकल्पनिश्चयाहंकार्यचैत्यांश्च सर्वानेतान्स्थूलवि
षयाननुभवतः। अस्मिन्नर्थे श्रुतिं संवादयति। जागरितस्थानो बहिः
प्रज्ञ इत्यादिश्रुतेः। अनयोर्विश्ववैश्वानरयोर्वनवृक्षावच्छिन्नाका

वेदांत· शब्दवाच्यंतेनचैजलाशयजलगतप्रतिबिंबाकाशदृष्टांतेनवृक्षवदिदमभेदंबोध
२५ यति। अत्राप्यनयोः स्थूलव्यष्टिसमष्ट्योस्तदुपहितविश्ववैश्वानरयोश्च
वनवृक्षवत्तदवच्छिन्नाकाशवच्च जलाशयजलवत्तद्गतप्रतिबिंबाकाश त
वच्च पूर्ववदभेदः स्थूलप्रपंचोत्पत्तिमुपसंहरति· एवंपंचीकृतभूतेभ्यः स्थूल
कारण प्रपंचोत्पत्तिः स्थूलसूक्ष्मप्रपंचानां व्यष्टिभूतानां प्रत्येकविवक्षया वांतर
प्रत्ययं च त्वमभिधायेदानीं तेषां समष्टेरेव महाप्रपंचत्वं दर्शयति। एतेषां
स्थूलसूक्ष्मकारणप्रपंचानामपि समष्टिरेको महान्प्रपंचो भवति· तत्र दृष्टां
तमाह। यथावांतरवनानानां समष्टिरेको महद्वनं भवति· यथावांतरजला २५
समष्टिरेको शयानां महान्जलाशयः। यथाधवादिरसालाशाद्यवांतरवनानां समष्टिः
३ समुदायविवक्षाएकं महद्वनं भवति। यथावापीकूपतडाकाद्यवांतरजला
शयानां समष्टिः समुदायविवक्षया एको महान् जलाशयो भवति· त।

था स्थूलसूक्ष्मकारणावांतरप्रपंचानां समुदाय एको महान्प्रपंचो भवतीत्यर्थः
एतद्वांतरमहाप्रपंचोपहितानां विश्वतैजसप्राज्ञानां वैश्वानरहिरण्यग
र्भव्याकृतानां चावांतरवनावच्छिन्नाकाशवद्यावांतरजलाशयगतप्रतिबिं
बाकाशवच्चाभेदइत्याह· एतदुपहितं वैश्वानरादीश्वरपर्यंतं चैतन्यमप्य
वांतरवनावच्छिन्नाकाशवद्वांतरजलाशयगतप्रतिबिंबाकाशव
च्चैकमेव चैतन्यप्रपंचयोरभेदे सर्वंखल्विदं ब्रह्मेति श्रुत्या विरोधमाशंक्यप
रिहरति· आभ्यां महत्प्रपंचतदुपहितचैतन्याभ्यां तप्तायःपिंडवदविवि
क्तं सदनुपहितं चैतन्यं सर्वं खल्विदं ब्रह्मेति वाक्यस्य वाच्यं भवति। अन्योन्यता वय
दात्म्याध्यासेनापि सर्वत्र लक्ष्यं भवति इत्यर्थः। अध्यारोपप्रकरणमुपसं
स्त्वा हरति· एवं वस्तुन्यवस्त्वारोपो अध्यारोपः सामान्येन दर्शितः। ईश्वरचैतन्ये

२६ सामान्यतो महाप्रपंचाध्यारोपप्रकारं सप्रपंचमभिधायेदानीं प्रत्यगात्म
निविशेषाध्यारोपप्रकारं दर्शयितुमुपक्रमते। इदानीमित्यादिना। इदमि
तिइदानीं प्रत्यगात्मनि इदमिदमारोपयतीति विशेष उच्यते। अतिप्रा मिदं०
कृतस्तु प्रत्यक्षादिसन्निहितस्यापत्यादिधर्मिण इदं इमादिमिति
षा निर्देशः क्रियते। इदमिदमित्यादिरेवं वीप्सा। तथा च अतिस्थूलबु
द्धिस्तु इदमपत्यादिकमेवाहमयं पुत्र एवाहमित्यं तद्बाह्यधर्मी विशेषणा
त्मन्यध्यारोपयतीत्यर्थः। अत्र श्रुतिमाह। आत्मा वै पुत्रनामा जायते पुत्र इति श्रु
तेः। तत्र युक्तिमाह। स्वस्मिन्निव पुत्रे प्रेमदर्शनात् पुत्रे पुष्टे नष्टे च अहमेव २६
पुष्टो नष्टश्चेत्याद्यनुभवाच्च। पुत्र आत्मेति वदति। यथा स्वशरीरे प्रेमदर्शना
दात्मत्वभ्रमः एवं स्वपुत्रादिशरीरेपि प्रेमदर्शनादात्मत्वभ्रम इत्यर्थः। अत्रानु

रूपमनुभवमाचष्टे। पुत्र इति। एतदपेक्षया विशिष्टबुद्धिरन्यः कश्चिदधिकारी स्वदे वा
हमेवात्मानं मन्यत इत्याह। चार्वाकस्तु अत्रापि श्रुतिमाह। स वा एष पुरुषोन्नरसमय
इत्यादिश्रुतेः। पुत्रादिशरीरस्य आत्मत्वाभावे युक्तिं दर्शयन् पूर्वोक्ताधिकारिणः
सकाशात्तस्य वैलक्षण्यं दर्शयति प्रदीप्तगृहात् स्वपुत्रं परित्यज्यापि स्वस्य निर्गमदर्श
नात् देहस्यात्मत्वे अनुभवं च प्रमाणयति। स्थूलोहमित्याद्यनुभवाच्च स्थूलशरीरमा
त्मेति वदति ततोप्युत्कृष्टः कोप्यधिकारी श्रुतियुक्त्यनुभवेभ्य इंद्रियाण्यात्मेति व
दतीत्याह अपरश्चार्वाकस्त्विह प्राणाः प्राजापतिमेत्य ब्रूयुरित्यादिश्रुतेः इंद्रिया प
णामभावे शरीरचलनाभावात् काणोहं बधिरोहमित्या द्यनुभवाच्च इंद्रियाण्या
त्मेति वदति ततोप्युत्तमोधिकारी कश्चित् श्रुतिप्रमाणानुभवबलात् प्राण एवात्मेत्याह।
अपरश्चार्वाकोन्य अंतर आत्मा प्राणमय इत्यादिश्रुतेः प्राणाभावे इंद्रियादि
चलनायोगात् अहमशनायावानहं पिपासावानित्याद्यनुभवाच्च प्राण आत्मे
ति वदति ततो विशिष्टोधिकारी कश्चित् स्वमतानुकूलश्रुत्यादिबलात् मन एवात्मे

६ ×स्वमतोपयोगिश्रुत्यादिवाभासादज्ञानमात्मेति वदंत इत्याह· प्राभाकरतार्किकौ ६ ॥

वेदांसा· त्याह· अन्यस्त्वार्वाको अन्योंतरात्मा मनोमय इत्यादिश्रुतेः। मनसि सुप्ते प्राणादे
२९ रभावात्· अहं संकल्पवानहं विकल्पवानित्याद्यनुभवाच्च मन आत्मेति वदति उक्ते ता
भ्यः पंचेभ्यो विलक्षणः कश्चिद्विज्ञानवादी श्रुत्यादिभिर्विज्ञानमात्मेति। बौधस्त्व
न्योंतर आत्मा विज्ञानमय इत्यादिश्रुतेः कर्तुरभावे करणस्य प्राप्त्यभावात्। अहं
कर्ता भोक्तेत्याद्यनुभवाच्च बुद्धिरात्मेति वदति उक्तेभ्यो तिरिक्तौ प्राभाकरतार्कि
कौ स्वमतोपयोगिश्रुत्यादि अन्योंतर आत्मा आनंदमय इत्यादिश्रुतेः बुध्या
दीनामज्ञाने लयदर्शनात् अहमज्ञोहमज्ञानीत्याद्यनुभवाच्च। अज्ञानमात्मेति
वदतः भाट्टास्तु अज्ञानावच्छिन्नं चैतन्यमात्मेत्याह· प्रज्ञानघन एवानंदमय इत्या
दिश्रुतेः सुषुप्तौ प्रकाशाप्रकाशसद्भावात् मामहं न जानामीत्याद्यनुभवाच्च· २८
ज्ञानो२ अज्ञोपहितं चैतन्यमात्मेति वदति· बौद्धैकदेशी कश्चिच्छ्रुत्यादिभिः ॥ शून्यमा
त्मेति वदति। अपरो बौद्धः असदेवेदमग्र आसीदित्यादिश्रुतेः सुषुप्तौ स

र्वाभावात् अहं सुप्तौ नासमित्युत्थितस्य स्वाभावपरामर्शविषयानुभवाच्च। शून्यमात्मेति वदति·
अधुना पुत्रादिशून्यपर्यंतानामात्मत्वप्रतिपादकश्रुत्यादेराभासत्वात् पूर्वपूर्वमतस्योत्तरो
त्तरमतबाध्यत्वाच्च दृश्यत्वजडत्वादिहेतुकैर्वक्ष्यमाणानात्मत्वं प्रसिद्धमेवेति प्रतिपाद
यितुं प्रतिजानीते। एतेषां पुत्रादीनामनात्मत्वमुच्यते। पुत्राद्यात्मत्ववादिनमेतिम घा
दाधिकारी रित्या तत्प्रतिपादितश्रुत्यादेरपि पूर्वपूर्वस्योत्तरोत्तरबाध्यत्वात् पुत्रादि
शून्यांतानामनात्मत्वं प्रसिद्धमेवेति प्रतिज्ञातमेवार्थं प्रकटयति· एतैरतिप्राकृतादि
वादिभिरुक्तेषु श्रुतियुक्त्यनुभवाभासेषु पूर्वपूर्वोक्तश्रुतियुक्त्यनुभवाभासानामु
भवा त्तरोत्तरश्रुतियुक्त्यनुभवाभासैरनात्मत्वबाधदर्शनात् पुत्रादीनामनात्मत्वं स्पष्टमेव ननु
पुत्रादिशून्यपर्यंतानामनात्मत्वे सिद्धे कस्तर्हि अहंप्रत्ययविषय आत्मेति आशंक्य त्मे
अस्थूलादिनिषेधवाक्यजातबोधितं सत्यं ज्ञानमनंतं ब्रह्मेत्यादिविधिवाक्यको
टिबोधितं यत्तत्त्वं ज्ञानानंतानंद्वयं ब्रह्म तदेवाहमालंबनमिति प्रबलश्रुतियुक्त्यनु

वेदांत॰ भवैः प्रतिपादयितुमाह। किंच प्रत्यगस्थूलोऽचक्षुरप्राणोऽमना अकर्त्ता चैतन्यं चि
न्मात्रं सदित्यादिश्रुत्यो प्रबलश्रुतिविरोधादस्य पुत्रादिशून्यपर्यंतस्य जडस्य चे
२९ न्य तं भास्यत्वेन घटादिवदनित्यत्वात् अस्थूलादिप्रबलश्रुतिवाक्यैः पुत्रादि
शून्यपर्यंतात्मातिरिक्तात्मस्वरूपप्रतिपादनात् पुत्रादीनां जडत्वादिहेतुभिरना
त्मत्वमित्यर्थः। अस्मिन्नर्थे प्रबलविद्वदनुभवं प्रमाणयति॰ अहं ब्रह्मेति विद्व
दनुभवबाधवल्याच्च। पुत्रादिश्रुत्यादीनां दौर्बल्यं दर्शयति॰ तत्र श्रुतियुक्त्यनु
भवाभासानां बाधितत्वादपि पुत्रादिशून्यपर्यंतमखिलमनात्मैव अतस्त
त्साक्षिकं नित्यशुद्धबुद्धमुक्तसत्यस्वभावं प्रत्यक्चैतन्यमेवात्मवस्त्विति वेदां
तविद्वदनुभवः यतः पुत्रादीनां जडत्वादिहेतुभिरनात्मत्वं अंतः पुत्रादिभा २९
सकं नित्यशुद्धबुद्धत्वादिस्वरूपमेवात्मवस्त्वित्यर्थः। नन्विदं विरुद्धं यत्पुत्रा
रा दीनामात्मप्रतिपादकश्रुतीनामप्रामाण्यं अस्थूलादिश्रुतीनां प्रामाण्यमि

ति न हि वेदवाक्येषु केषांचिदप्रामाण्यं केषांचित्प्रामाण्यमिति वा शक्यं प्र
तिपादयितुं एवं चेत् पुत्रादिश्रुतीनां प्रामाण्यमस्थूलादिवाक्यानामप्रामाण्यमिति
वैपरीत्यं किं न स्यात्॰ वेदवाक्यत्वाविशेषात्॰ किं केषांचिद्वेदांतवाक्यानामप्रामाण्य
प्रतिपादनार्थमिदं प्रकरणमारब्धं अतः निर्णय इति चेत्॰ अत्रोच्यते। पुत्रादिश्रु
तीनां सर्वथैव प्रामाण्यं नास्तीति न निषिध्यते किंतु अस्थूलादिप्रबलश्रुतिस्मृ
तिन्यायविरोधात् स्वार्थे तात्पर्याभावात् तेषां स्थूलारुंधतीन्यायेन पूर्वपूर्वनिरा
करणद्वारा सूक्ष्मसूक्ष्मवस्तूपदेशे तात्पर्यमित्येतावदेव प्रतिपाद्यते तथाहि॰ ध्रु
वमरुंधतीं च दर्शयतीति विधिबलाद्वधूवरयोररुंधतीदर्शने प्राप्ते परमसूक्ष्मरू
पाया अरुंधत्याः प्रथमकक्षायामेव प्रतिपत्तुमशक्यत्वात् प्रथमं चंद्रज्योति
रूपारुंधतीत्युच्यते ततः चंद्रभिन्नातारकारुंधतीत्युच्यते तदनंतरं इतरता
रकावलष्ट्यभिन्नातारका जितयात्मिकेत्युच्यते ततस्तन्मध्यतारकेत्युच्यते॰
ततश्च इतरतारकाभिन्ना सप्ततारकात्मकारुंधतीत्युच्यते ४२

ततस्तत्समीपवर्त्तिनी परमसूक्ष्मारुंधतीत्युच्यते नचैतावता एतेषां पंचानां वाक्यानां
परस्परविरुद्धार्थप्रतिपादकत्वेनाप्रामाण्यं शक्यं प्रतिपादयितुं किंतु प्रतिपन्नबुद्ध्यनु
सारेण सोपानक्रमवत्पूर्वपूर्वनिराकरणद्वारा सूक्ष्मारुंधतीप्रतिपादनेनात्पर्यात् तद्वद
त्रापि अन्नमयः प्राणमयो मनोमयो विज्ञानमय आनंदमय आत्मा ब्रह्म ब्रह्मपुच्छंप
तिष्ठेति पुच्छब्रह्मपर्यवसितानां पंचकोशवाक्यानामपि परस्परविरुद्धप्रतिपादकत्वेपि र्थ
बु प्रतिपन्नबुद्ध्यनुसारेण सोपानक्रमवत्पूर्वपूर्वनिराकरणद्वारा परमसूक्ष्मपुच्छब्रह्मप्रति
पादनेतात्पर्यात् तस्मात्सर्वेषां वेदवाक्यानां साक्षात्परंपरया वा। अद्वितीयवस्तुप्रतिपा
दनेतात्पर्यात्प्रामाण्याविरोध इति संक्षेपः। विशेषाध्यारोपप्रकरणमुपसंहरति · एवम
ध्यारोपः आत्मवस्तुनि मिथ्याप्रपंचस्य सामान्यतो विशेषतश्च। अध्यारोपप्रकारं सप्र २९
पंचमभिधायेदानीं तदपवादप्रकारं वक्तुमारभते। अपवादो नामेति · असंगोदासी
नेपरमात्मवस्तुनि तद्विवर्त्तवस्तुभूताज्ञानादि मिथ्याप्रपंचस्य चिद्वस्तुमात्रावशेषतया
अवस्थानमेवापवाद इति वक्तुं प्रथमं लौकिकं दृष्टांतमाह। रज्जुविवर्त्तस्य सर्पस्य रज्जुमा
त्रत्ववत् वस्तुविवर्त्तस्यावस्तुनो ज्ञानादेः प्रपंचस्य वस्तुमात्रत्वं रज्जुः स्वरूपापरित्यागेन सर्पा

कारेणावभासमानस्य रज्जुः स्वरज्जुस्वरूपापरित्यागेन सर्पाकारेण मिथ्याप्रतिभासते।
अत्र वेदांते ब्रह्मणि प्रपंचभानस्य परिणामभावो नांगीक्रियते। दुग्धादिवद्ब्रह्म
णो विकारित्वप्रसंगादनित्यत्वादिदोषापत्तेः विवर्त्तभावांगीकारेतु नायं दोषः।
ब्रह्मणि प्रपंचभानस्य मिथ्यात्वेन विकारित्वाभावात् तदुक्तं अधिष्ठानावशेषो
हि नाशः कल्पितवस्तुन इति तस्मात् द्विवर्त्तस्य प्रपंचस्य चिन्मात्रावस्थानमेवा
पवाद इति भावः। अस्मिन्नर्थे ग्रंथांतरसंवादं दर्शयति · तदुक्तं सतत्वतोन्यथाप्र
था विकार इत्युक्त विवर्त्तस्यापवादो नाशो नामाधिष्ठानरज्जुमात्रतया अवस्थान
वद्विवर्त्तस्याज्ञानादिप्रपंचस्य नाशो नाम चिन्मात्रत्वेनावस्थानमित्यर्थः॥
अत्र यथापूर्वरूपेणावस्थितस्य वस्तुनोन्यथाभावो द्विधा भवति · परिणामभा
वो विवर्त्तभावश्चेति तत्र परिणामभावो नाम वस्तुनः यथार्थतः स्वस्वरूपं परि
त्यज्य स्वरूपांतरापत्तिः यथा दुग्धमेव स्वस्वरूपं परित्यज्य दध्याकारेण परिणम ५या
ते विवर्त्तभावस्तु वस्तुनः स्वस्वरूपापरित्यागेन स्वरूपांतरेण मिथ्याप्रतीतिः

यथाऽइत्युदीरितः अतत्त्वतोऽन्यथाप्रथा विवर्त इत्युदीरितः सामान्यतो दर्शि
३० तामपवादप्रक्रियां विस्तरेण प्रतिपादयितुं प्रतिजानीते। तथाहि। स्थूलसूक्ष्मका
रणप्रपंचानां उत्पत्तिवैपरीत्येन तत्तत्कारणरूपेणावस्थानमेवापवाद इत्या
ह• एतद्भोगायतनचतुर्विधसकलस्थूलशरीरजातं भोग्यरूपान्नपानादि
कं एतदायतनभूतं भूरादिचतुर्दशभुवनानि एतदायतनभूतब्रह्माण्डं च एतत्सर्व
मेतेषां कारणरूपं पंचीकृतभूतमात्रं भवति• एतानि शब्दादिविषयसहितानि
पंचीकृतानि भूतानि सूक्ष्मशरीरजातं च एतत्सर्वमेतेषां कारणरूपापंचीकृत
भूतमात्रं भवंति• एतानि सत्वादिगुणसहितानि अपंचीकृतानि उत्पत्तिव्युत्क्र
मेणा एतत्कारणभूताज्ञानोपहितचैतन्यमात्रं भवति• एतदज्ञानमज्ञानोप ३०
हितचैतन्यं चेश्वरादिकं एतदाधारभूतानुपहितचैतन्यरूपं तुरीयमात्रं ब्रह्म
भवति• एतत्स्थूलशरीरं स्वाश्रयब्रह्माण्डसहितं स्वकारणभूतपंचीकृतेषु पं
चमहाभूतेषु लीनं सत्तन्मात्रतयावतिष्ठते तानि च पंचीकृतानि भूतेषु तानि श

ब्दादिसहकृतानि सप्तदशावयवात्मकलिंगशरीराणि स्वकारणेष्वपंचीकृत
भूतेषु लीनानि भवंति तान्यपंचीकृतानि सत्वादिगुणसहितानि स्वकारणाज्ञा
नोपहितचैतन्ये लीनानि भवंति• तच्चाज्ञानं तदुपहितचैतन्यं सर्वज्ञत्वादिवि
शिष्टं च स्वाधारभूतानुपहितचैतन्ये लीनं भवति चैतन्यमेवावशिष्यत इत्यर्थः
फलितमाह• आभ्यामध्यारोपापवादाभ्यां तत्त्वंपदार्थशोधनमपि सिद्धं
भवति• तत्त्वंपदार्थशोधनप्रकारं प्रतिजानीते॥ तथाहि• अज्ञानादिसम
ष्टिरेतदुपहितं सर्वज्ञत्वादिविशिष्टं चैतन्यं। एतदनुपहितं चैतत्त्रयं तप्तायः
पिंडवदेकत्वेनावभासमानं तत्पदवाच्यार्थो भवति। अज्ञानं तदवच्छिन्नेश्वर
चैतन्यं तदनुपहितचैतन्यं च एतत्त्रयं तप्तायःपिंडवदन्योन्यतादात्म्याध्यासे
नैकत्वेन प्रतीयमानं सत् तत्पदवाच्यार्थो भवतीत्यर्थः॥ तत्पदलक्ष्यार्थमा
ह। तदुपाध्युपहिताधारमनुपहितं चैतन्यं तत्पदलक्ष्यार्थो भवति। अ

वेदांतसा ज्ञानावच्छिन्नेश्वरचैतन्यस्य आधारभूतं यदनुपहितचैतन्यं तत्ताभ्यां वि
विक्तं सद्देवविवक्षया तत्पदलक्ष्यार्थो भवतीत्यर्थः॥ त्वंपदवाच्यार्थमाह॥ अ रनु
३१ ज्ञानादिव्यष्टिरेतदुपहितं ज्ञातत्वादिविशिष्टं चैतन्यं एतदनुपहितं चैतन्यं चैतत्त्रयं तप्ता
यःपिंडवदेकत्वेनावभासमानं त्वंपदवाच्यार्थो भवति॥ व्यष्टिभूतमज्ञानं यदंतःक
रणं तदवच्छिन्नं जीवचैतन्यं तदनुपहितचैतन्यं चैत्यं तत्त्रयं तप्तायःपिंडवत्पर
स्परतादात्म्याध्यासेनाभेदविवक्षया त्वंपदवाच्यार्थो भवतीत्यर्थः॥ त्वंप मत्यक्षी
दलक्ष्यार्थमाह॥ एतदुपाध्युपहिताधारभूतं प्रत्यगानंदं तुरीयं चैतन्यं त्वंपद त
लक्ष्यार्थो भवति॥ अंतःकरणोपहितचैतन्यत्रयस्य आधारभूतं यदनु
पहितं प्रत्यगानंदं तुरीयं चैतन्यं त्वंपदलक्ष्यार्थो भवतीत्यर्थः॥ अथ महा
वाक्यार्थो वर्ण्यते। ननु जीवेश्वरयोः किंचिज्ज्ञत्वसर्वज्ञत्वादिविशिष्टयोरत्यंतविलक्ष ३२
णयोस्तत्त्वमस्यादिमहावाक्यानि परस्परविरुद्धार्थप्रतिपादकानि कथमखंडैकर
सं प्रतिपादयंतीत्याशंक्य साक्षादैक्यप्रतिपादकत्वाभावेपि लक्षणया संबंधत्रयेणअ
पदार्थमभिधाय वाक्यार्थमाह ४

खंडैकार्थप्रतिपादयंतीत्याह॥ इदं तत्त्वमसिवाक्यं संबंधत्रयेणाखंडार्थबोधकं भवति॥ संबंधत्र
ना यस्वरूपमाह॥ संबंधत्रयं नाम पदयोः सामानाधिकरण्यं पदार्थयोर्विशेषणविशेष्यभावः
प्रत्यगात्मलक्षणयोः लक्ष्यलक्षणभावश्चेति पदार्थप्रत्यगात्मनां संबंधत्रयसद्भावेदृसं
मतिमाह॥१ तदुक्तं सामानाधिकरण्यं च विशेषणविशेष्यता। लक्ष्यलक्षणसंबंधः पदार्थप्र सं
त्यगात्मनामिति पदयोः सामानाधिकरण्यमुदाहरणनिष्टंकत्वात्प्रदर्शयति सामानाधि मा
करण्यसंबंधस्तावत् यथा सोयं देवदत्त इति अस्मिन्वाक्ये तत्कालविशिष्टदेवदत्त
वाचकसशब्दस्य एतत्कालविशिष्टदेवदत्तवाचकोयंशब्दस्य च एकस्मिन्पिंडे
तात्पर्यासंबंधः भिन्नप्रवृत्तिनिमित्तयोः शब्दयोरेकस्मिन्नर्थेवृत्तिः सामाना
धिकरण्यं तत्र सोयं देवदत्त इति वाक्ये स इति तत्पदस्य तत्कालतद्देशवैशिष्ट्य
प्रवृत्तिनिमित्तं एतत्कालैतद्देशवैशिष्ट्यमयंशब्दस्य प्रवृत्तिनिमित्तं तथा च भि
न्नप्रवृत्तिनिमित्तयोः सोयंशब्दयोरेकस्मिन् देवदत्तपिंडे तात्पर्यसंबंधः सामाना

धिकरण्यमित्यर्थः॥ उक्तमर्थं दार्ष्टांतिके योजयति· तथा च तत्वमसीतिवाक्येपि प
रोक्षत्वादिविशिष्टचैतन्यवाचकतत्पदस्यापरोक्षत्वादिविशिष्टचैतन्यवाचक
त्वंपदस्य च एकस्मिन्चैतन्ये तात्पर्यसंबंधः तथा तत्त्वमसीतिवाक्येपि परोक्षत्व
सर्वज्ञत्वादिवैशिष्ट्यं तत्पदप्रवृत्तिनिमित्तमपरोक्षत्वं किंचित्ज्ञत्वादिवैशिष्ट्यं
त्वंपदप्रवृत्तिनिमित्तं तथा च भिन्नप्रवृत्तिनिमित्तयोः तत्त्वंपदयोरेकस्मिन्चैत
न्ये तात्पर्यसंबंधः सामानाधिकरण्यमित्यर्थः॥ विशेषणविशेष्यभावसंबंध
स्वरूपमाह· विशेषणविशेष्यभावसंबंधस्तु यथा तत्रैव वाक्ये सशब्दार्थतत्
त्कालविशिष्टदेवदत्तस्य अयंशब्दार्थैतत्कालविशिष्टदेवदत्तस्य च अन्योन्यभेद
व्यावर्तकतया विशेषणविशेष्यभावः व्यावर्तकं विशेषणं व्यावर्त्यं विशेष्यं तथा त ३२
सोयं देवदत्त इतिवाक्य एव अयंशब्दवाच्यो योसौ वै तत्काले तद्देशसंबंधविशिष्टो
देवदत्तपिंडः एवं स इति· तच्छब्दवाच्यात् तत्कालतद्देशविशिष्टदेवदत्तपिंडाद्भिन्नो
×अयं×

नेतियदाप्रतीयते तदा तच्छब्दार्थस्य अयंशब्दवाच्यार्थनिष्ठभेदव्यावर्तकतया विशेषणत्वं
अयंशब्दार्थस्य व्यावर्त्यत्वाद्विशेष्यत्वं। यदा च स इति तच्छब्दवाच्यार्थस्तत्कालतद्देशवि
शिष्टो देवदत्तपिंडः स अयमिति इदंशब्दवाच्यादेतत्कालैतद्देशसंबंधविशिष्टादस्मा
द्देवदत्तपिंडान्नभिन्नहुते। इतियदाप्रतीयते तदा अयंशब्दवाच्यस्य तच्छब्दार्थनिष्ठभेद
व्यावर्तकतया विशेषणत्वं तच्छब्दार्थस्य व्यावर्त्यत्वाद्विशेष्यत्वं तथा च अयमेव सः स
एवायमित्यन्योन्यभेदव्यावर्तकतया सोयं शब्दार्थयोः परस्परं विशेषणविशेष्यभा
व इत्यर्थः॥ उक्तं विशेषणविशेष्यभावं दार्ष्टांतिके योजयति· तथा अत्रापि वाक्ये तत्प
दार्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वंपदार्थपरोक्षत्वादिचैतन्यस्य वान्योन्यभेद
व्यावर्तकतया विशेषणविशेष्यभावः॥ इहापि तत्त्वमसिवाक्येपि त्वंपदवाच्यं यद
परोक्षत्वकिंचित्ज्ञत्वादिविशिष्टं चैतन्यं तत्पदवाच्यात् सर्वज्ञत्वादिविशिष्टचैतन्या
न्नभिद्यत इदानीं तियदाप्रतीयते तदा तच्छब्दार्थत्वंपदार्थनिष्ठभेदव्यावर्तकतया
विशेषणत्वं। यदा च तत्पदवाच्यं यत्सर्वज्ञत्वादिविशिष्टचैतन्यं तत् त्वंपदवाच्यात्

वेदां॰ किंचिज्ज्ञत्वादिविशिष्टचैतन्याभिन्नत्वमवइतियदाप्रतीयतेतदात्वंपदार्थस्तत्पदार्थ
३२ निष्ठभेदव्यावर्तकत्वेनविशेषणत्वंतत्पदार्थस्यविशेष्यत्वंतत्पदार्थस्यविशेष्यत्वं
तथाचत्वंतदपितत्त्वमसीतितत्त्वंपदार्थयोःपरस्परंभेदव्यावर्तकत्वेनपरस्परवि
शेषणविशेष्यभावइत्यर्थः क्रमप्राप्तंलक्ष्यलक्षणभावसंबंधस्वरूपंनिरूपयि
तुमाह॰ लक्ष्यलक्षणसंबंधस्तु यथातत्रसशब्दोयंशब्दयोस्तदर्थयोर्वाविरु
द्धतत्कालैतत्कालविशिष्टत्वपरित्यागेनाविरुद्धदेवदत्तेनसहलक्ष्यलक्ष
णभावः॥ असाधारणधर्मप्रतिपादकंलक्षणवाक्यंतत्प्रतिपाद्यमवशिष्टं
वस्तुलक्ष्यमित्युच्यते। तथाचसोयंदेवदत्तइत्यस्मिन्नेववाक्येसोयंशब्दयोस्त
दर्थयोर्वाविरुद्धतत्कालैतद्देशविशिष्टत्वपरिहारेणाविरुद्धदेवदत्तविशि ३२
ष्टदेवदत्तपिंडेनसहदेवदत्तविशिष्टदेवदत्तवाचकशब्दस्यलक्ष्यलक्षण
भावसंबंधइत्यर्थः। उक्तमर्थंदार्ष्टान्तिकेयोजयतितथात्रापिवाक्येतत्त्वं

पदयोस्तदर्थयोर्वाविरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टपरित्यागेनाविरुद्धचै
तन्येनसहलक्ष्यलक्षणभावः॥ इहापितत्त्वंपदयोस्तदर्थयोर्वाविरुद्धपरोक्ष
त्वापरोक्षत्वादिविशिष्टत्वपरित्यागेनतत्त्वंपदाभ्यांलक्ष्याविरुद्धचैतन्येनसह
तत्त्वंपदयोर्लक्ष्यलक्षणभावःसंबंधइत्यर्थः। अत्रतत्त्वंपदयोस्तदर्थयोश्च
त्यक्तविरुद्धांशयोर्लक्षणत्वं। अखंडचैतन्यस्यलक्ष्यत्वमितिभावः। ननुत
त्त्वमस्यादिमहावाक्यानांलक्ष्यलक्षणभावसंबंधपुरस्कारेणचैतन्य
बोधकत्वमुक्तं। अन्यत्रतुशास्त्रेतेषांवाक्यानांभागलक्षणयैवचैतन्यबो ग
धकत्वंप्रतिबोधकत्वंप्रतिपाद्यतेतत्त्वमस्यादिवाक्येषुलक्षणाभागलक्षणे
त्यादिविरोधमाशंक्यसंज्ञाभेदेनवस्तुभेदइत्याह॰ इयमेवभागलक्षणोच्य
तेतेनतत्त्वमस्यादिवाक्यानांविरुद्धांशपरित्यागेनाविरुद्धचैतन्यमात्रबोधकत्व

मेवभागलक्षणेनोच्यत इत्यर्थः। ननुयथानीलोत्पलमितिवाक्येनीलत्वविशिष्ट
३४ नीलगुणस्यउत्पलत्वविशिष्टत्वोपलद्रव्यस्यवस्तव्यतिरिक्तशुक्लादिगुणांतरपटा
दिद्रव्यांतरव्यावर्तकत्वेनविशेषणविशेष्यभावनिरूपिततद्भिन्नसंसर्गस्यनील
गुणवैशिष्ट्यस्यवाक्यार्थत्वंतथेहापितत्वादिविशिष्टचैतन्यस्यचान्योन्यभेदव्या
वर्तकतयाविशेष्यभूतसर्वज्ञत्वकिंचिज्ज्ञत्वोभयनिरूपितसंसर्गोवासर्वज्ञत्वादि
विशिष्टस्यकिंचिज्ज्ञत्वादिविशिष्टेनसहैक्यंवावाक्यार्थोभवतुइत्याशंक्यदृष्टां
तदार्ष्टांतिकयोर्वैषम्यान्नैवमित्याह। अस्मिन्नित्यादिना अस्मिन्वाक्येनील
मुत्पलमितिवाक्यवत्वाक्यार्थोनसंगच्छते। अस्मिंस्तत्त्वमसीतिवाक्येनीलो ३४
विशिष्टोवा त्पलमित्यादिवाक्यवत्संसर्गोवावाक्यार्थोनसंगच्छत इत्यर्थः। नीलोत्पलमि
तिवाक्यस्यसंसर्गवैशिष्ट्यार्थप्रतिपादकत्वकल्पनेविरोधाभावंदर्शयति-

स्य

तत्रतुनीलपदार्थनीलगुणस्यउत्पलपदार्थउत्पलद्रव्यस्यचशोक्लपटादिव्यावर्तकतयान्यो
न्यविशेषणविशेष्यभावसंसर्गस्यान्यतरविशिष्टस्यान्यतरस्यतदैक्यस्यवावाक्यार्थ
त्वांगीकारेप्रमाणांतरविरोधाभावात्तद्वाक्यार्थःसंगच्छते नीलोत्पलपदार्थ
योर्गुणगुणिनोर्विशेषणविशेष्यभावसंसर्गस्यनीलगुणविशिष्टोत्पलयोरै
क्यस्यवावाक्यार्थत्वांगीकारेप्रत्यक्षादिप्रमाणांतरविरोधाभावात्तत्रतथासंगच्छत
इतिभावः। तत्त्वमसीतिवाक्येतुतत्त्वंपदार्थयोःसर्वज्ञत्वादिकिंचिज्ज्ञत्वा
दिविशिष्टजीवचैतन्यस्यवाकिंचिज्ज्ञत्वादिविशिष्टेश्वरस्यसर्वज्ञचैतन्यस्यवा
तदुभयविशिष्टचैतन्यैक्यस्यवावाक्यार्थत्वांगीकारेप्रत्यक्षादिप्रमाणांतरवि
रोधात्सर्वस्माद्वैषम्यंदर्शयति- अत्रतुतदर्थपरोक्षत्वादिविशिष्टचैतन्यस्यत्व
त्वमर्थापरोक्षत्वादिविशिष्टचैतन्यस्यचअन्योन्यभेदव्यावर्तकतयाविशे

षणात्वयाविशेष्यभावसंसर्गस्यान्यतरविशिष्टस्यान्यतरतदैक्यस्यवावाक्यार्थत्वांगीकारे
३९ प्रत्यक्षादिप्रमाणविरोधाद्वाक्यार्थोनसंगच्छतेतदुक्तंसंसर्गोवाविशिष्टोवावाक्यार्थोना
मनः त्रसंमतः अखंडैकरसत्वेनवाक्यार्थोविदुषांमतइति नन्वतत्त्वमस्यादिमहावाक्यमखं
डार्थंकथंबोधयति।जहल्लक्षणयावाकिमजहल्लक्षणयाआहोस्विज्जहदजहल्लक्षण
येतित्रिधाविकल्पः।आद्येदूषणमाह।अत्रतुअत्रतत्त्वमसीतिवाक्येजहल्लक्षणानसंग
च्छतेइत्यन्वयः।तदेवदर्शयितुंजहल्लक्षणायाउदाहरणंतावदाह।गंगायांघोषःप्रतिवस
तिप्रतीतिवज्जहल्लक्षणापिनसंगच्छते।मानांतरविरोधेतुमुख्यार्थस्यपरिग्रहेमुख्या
र्थेनाविनाभूतेप्रवृत्तिर्लक्षणोच्यतेइतिवचनाद्गंगाघोषमनासंभवाद्गंगायांघोषइतिवा
क्यस्यमुख्यार्थविरोधेसतिमुख्यार्थंपरित्यज्यलक्षणयातत्संबंधिनितीरेघोषा ३९
वस्थानप्रतिपादनात्तत्रजहल्लक्षणांगीकारेयुज्यतइत्याह। तत्रतुगंगाघोषयोराधाराधे
यभावलक्षणस्यवाक्यार्थस्याशेषतोविरुद्धत्वाद्वाच्यार्थमशेषतःपरित्यज्यतत्संबंधिती
रलक्षणायायुक्तत्वाज्जहल्लक्षणासंगच्छतेआधाराधेयभावलक्षणंसर्वथापरित्यज्येत्यर्थः।

वृ॰प्र तत्त्वमसीतिवाक्येप्रागुक्तांतिज्ञातंजहल्लक्षणायाअसंभवमाविष्करोतिअत्रतुपरोक्षत्वादिवि
शिष्टचैतन्यैकत्वलक्षणस्यवाक्यार्थस्यभागमात्रेविरोधात्तुशब्दःपूर्वस्माद्वैषम्यंद्यो
तयतितत्त्वमसीतिवाक्येपरोक्षापरोक्षचैतन्यैकत्वलक्षणस्यवाच्यार्थस्यविरोधाभावा
त्परोक्षत्वापरोक्षत्वप्रतिपादकत्वांशेविरोधाच्चैतन्यैकत्वेविरोधाभावाद्गंगाघोषादि
वाक्यवत्तत्त्वमिनामुख्यार्थपरित्यागासंभवाज्जहल्लक्षणानसंभवतीत्यर्थः।तत्रहेतु
माह।भागांतरमपिपरित्यज्यान्यलक्षणायाअयुक्तत्वाज्जहल्लक्षणानसंगच्छतेवि
रुद्धयोःपरोक्षत्वापरोक्षत्वयोरेकत्वासंभवेनपरित्यागेपिचैतन्यभागस्यैकत्वेविरोधा
भावात्त्यागोनयुज्यतइत्यर्थः।ननुयथागंगायांघोषःप्रतिवसतीतिवाक्येगंगापदंप्रवा
हलक्षणांस्वार्थंपरित्यज्यस्वसंबंधितीरपदार्थंलक्षयति।तथातत्त्वमसीतिवाक्येतत्पदं
स्वार्थंपरोक्षत्वविशिष्टंपरित्यज्यजीवचैतन्यंलक्षयतु।एवंत्वंपदमपिस्वार्थंकिंचिज्ञ त
त्वादिविशिष्टंपरित्यज्यईश्वरचैतन्यंवालक्षयतुतस्माज्जहल्लक्षणैवभवत्वित्याशंक्य

निराकरोति॰ ननु गंगापदं स्वार्थपरित्यागेन तीरपदार्थं यथा लक्षयति॰ यथा न तत्पदं त्वंपदं वा स्वा त
३६ र्थपरित्यागेन त्वंपदार्थं तत्पदार्थं लक्षयतु। अतः कुतो जहल्लक्षणा न संगच्छत इति वाक्या
निराकरणप्रकारमेवाह। तत्रेत्यादि। तत्र तीरपदार्थश्रवणेन तदर्थप्रतीतौ लक्षणया तत्प्र
तीत्यपेक्षायामपि तत्त्वंपदयोः श्रूयमाणत्वेन तदर्थप्रतीतौ लक्षणया पुनरन्यतरपदेना
न्यतरपदार्थप्रतीत्यपेक्षाभावात् श्रुतवाक्यस्य मुख्यार्थविरोधे मुख्यार्थसंबंधिन्य
श्रुतपदार्थे लक्षणेति सर्वजनसिद्धं तथा च गंगायां घोष इत्यत्र श्रुतवाक्यार्थस्य गंगा
घोषयोराधाराधेयभावसंबंधविरोधे सति श्रूयमाणं गंगापदं स्वार्थपरित्यागेन ती
रपदार्थं लक्षयतीति युक्तं गंगापदार्थस्य तीरपदार्थप्रतीतिसापेक्षत्वात् इह तु श्रूय
माणं तत्त्वंपदयोर्मुख्यतयैव तदर्थं सर्वज्ञत्वकिंचिज्ज्ञत्वादि विशिष्टप्रतीतौ सत्याम ३६
पि लक्षणया तत्पदेन त्वंपदार्थप्रतीत्यपेक्षाभावात् त्वंपदेन तत्पदेन तत्पदार्थप्रतीत्य
पेक्षाभावाच्च मोक्षार्थं संभवति लक्षणा वा अन्यज्जहल्लक्षणापि न संभवति अत्र त

त्त्वमसीति वाक्ये अजहल्लक्षणापि न संभवतीत्यन्वयः कुत इत्यत आह। तत्र शोणगुणगम
नलक्षणस्य वाक्यार्थस्य विरुद्धत्वात् तदपरित्यागेन तदाश्रयाश्वादिलक्षणया तद्विरो
धपरिहारसंभवात् अजहल्लक्षणा संभवति अत्र तु परोक्षत्वापरोक्षत्वा विशिष्टचैत
न्यैकत्वस्य वाक्यार्थस्य विरुद्धत्वात् तदपरित्यागेन संबंधिनो यस्य कस्यचिदर्थस्य
लक्षितत्वेपि तद्विरोधापरिहारसंभवात् अजहल्लक्षणापि न संभवत्येव। तत्र शो
णो धावतीत्यादि वाक्ये शोणगुणस्य गमनासंभवेन वाक्यस्य मुख्यार्थवि
रोधे सति श्रूयमाणे शोणपदं स्वार्थापरित्यागेन स्वाश्रयमश्वादिकं लक्ष
यतीति युक्तम्। अत्र तु तत्त्वमस्यादि वाक्ये तत्त्वंपदार्थस्य परोक्षत्वादिवि
शिष्टचैतन्यैकत्वलक्षणस्य मुख्यवाक्यार्थस्य विरुद्धत्वात् परोक्षत्वापरित्या
गेन तद्विशिष्टचैतन्यलक्षणार्थस्य च लक्षितत्वेपि तद्विरोधपरिहाराभावा

दजहल्लक्षणा न संभवतीत्यर्थः। ननु तत्पदं स्वार्थविरुद्धपरोक्षत्वादिधर्मं परित्यज्य अविरु-
द्धचैतन्यांशपरित्यागेन त्वंपदार्थं किंचिज्ज्ञत्वादिविशिष्टं जीवचैतन्यं लक्षयतु त्वंप-
दं वा स्वार्थविरुद्धापरोक्षत्वादिधर्मं परित्यज्य अविरुद्धचैतन्यांशापरित्यागेन तत्पदा-
र्थं सर्वज्ञत्वादिविशिष्टमीश्वरचैतन्यं लक्षयतु किं भागलक्षणांगीकारेणेत्याशंक्य निरा-
करोति। न च तत्पदं त्वंपदं वा स्वार्थविरुद्धांशपरित्यागेन अंशांतरसहितं तत्पदार्थं लक्ष-
यतीत्यर्थः। मानांतरविरोध इत्युक्तन्यायेनेत्यर्थः। उक्तमर्थं दार्ष्टांतिके योजयति-तथा प
तत्त्वमसीति वाक्यं तदर्थो वा परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य वाच्या- श्रीः
र्थस्यांशे विरोधाद्विरुद्धं परोक्षत्वापरोक्षत्वांशं परित्यज्य अविरुद्धमखंडचैतन्यमा- ३८
त्रं लक्षयतीति तथा तत्त्वमसीति स्यादिवाक्यस्यापि त्वंपदं वा लक्षयतु अतः कथं
प्रकारांतरेण भागलक्षणांगीकरणमिति वाच्यं। एकेन पदेन स्वार्थांशपदार्थांत-
रोभयलक्षणाया असंभवात् एकेन तत्पदेन त्वंपदेन वा स्वार्थांशपरित्यागेन प-

रित्यागेन पदार्थांतरोभयलक्षणासंभवादित्यर्थः। अजहल्लक्षणासंभवे हेत्वंतरमाह-पा-
दांतरेण तदर्थप्रतीतेर्लक्षणया मनस्तत्प्रतीत्यपेक्षाभावाच्च तत्पदेन त्वंपदेन वा तत्तदर्थ-
प्रतीतौ सत्यां लक्षणया पुनरन्यतरस्यान्यतरप्रतीत्यपेक्षाभावादित्यर्थः। अतः परिशे-
पञ्च षात्तृतीयैवांगीस्वीकर्तव्य इत्युपसंहरति तस्माद्यथा सोयं देवदत्त इति वाक्यं तदर्थो
वा तत्कालैतत्कालविशिष्टदेवदत्तलक्षणस्य वाच्यार्थस्यांशे विरोधाद्विरुद्धतत्कालै-
तत्कालविशिष्टांशं परित्यज्याविरुद्धं देवदत्तांशमात्रं लक्षयति। तस्मादिति। यस्मा-
त्तत्त्वमस्यादिवाक्ये जहल्लक्षणा अजहल्लक्षणयोरसंभवस्तस्माज्जहदजहल्लक्षणया वि-
रुद्धांशं परित्यज्य अविरुद्धमखंडचैतन्यमात्रं लक्षयतीति योजना। तत्र दृष्टांत-
माह-यथेति। यथा सोयं देवदत्त वाक्ये प्रागुक्तजहल्लक्षणाजहल्लक्षणयोर-
संभवेन तदर्थस्य तत्कालतद्देशविशिष्टस्यैतत्कालैतद्देशविशिष्टस्य देवदत्तल-
क्षणवाक्यार्थस्य एकस्मिन्नंशे तत्कालैतत्कालविशिष्टभागे विरोधदर्शनात्

नत्वपरित्यागेनाविरुद्धदेवदत्तपिंडमात्रं परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्ष्य
३८ णामुख्यार्थप्रतिपादकत्वासंभवात् जहदजहल्लक्षणया विरुद्धपरोक्षापरोक्षत्वादिवि ण
शिष्टांशपरित्यागेनाविरुद्धाखंडचैतन्यमात्रप्रतिपादकत्वं तस्येत्यर्थः। अखंडचै
तन्यप्रतिपादकस्य तत्त्वमसीतिवाक्यस्यार्थं प्रपंचमभिधायेदानीं यानुभवो
त्या नुभववाक्यार्थविर्णयते इह। अथाधुनाहं ब्रह्मास्मीत्यनुभववाक्यार्थो वर्ण्य
ते गुरुमुखान्नवरुत्वस्तत्त्वमस्यादिवाक्यश्रवणाद्देहाद्यहंकारांतजडप
दार्थसकलदृश्यविलक्षणप्रत्यगात्मनः शुद्धेन परमात्मना सहैकत्वबोधा
नंतरं कश्चिदधिकारी लब्धावसरं सर्वोपाधिविनिर्मुक्तं सच्चिदानंदैक ३८
रसमनुभवेन जिज्ञासुराचार्योपदिष्टमहं ब्रह्मास्मीतिवाक्यार्थमनुस्मर
न्स्वात्मानंदमनुभवतीत्यर्थः॥ तत्प्रकारमेवाह। एवमित्यादिना एवमाचा

र्येणाध्यारोपापवादपुरस्सरं त्वंपदार्थौ शोधयित्वा वाक्येनाखंडार्थेऽ
वबोधिते अधिकारिणा अहं नित्यशुद्धबुद्धमुक्तसत्यस्वभावपरमानंदानंता
द्वयं ब्रह्मास्मीत्यखंडाकाराकारिता चित्तवृत्तिः। एवं संक्षेपेण प्रमाणप्रका
रेणाधिकारिणश्चित्तवृत्तिरुदेतीति संबंधः॥ कदेत्यपेक्षायामाह॥ आचा
र्येणेति॥ ॥आचार्येणाविषये संगे निष्कलचैतन्ये शशशृंगायमाणाव
द्याहंकारादिशरीरांतमिथ्यापदार्थमध्यारोप्य तदपवादपुरस्सरं तत्त्वंपदा
र्थौ शोधयित्वा तत्त्वमसीतिवाक्येन जहदजहल्लक्षणया विरुद्धांशपरित्यागे
नाखंडार्थचैतन्ये ज्ञाते सतीत्यर्थः। किंविषयाणीति चित्तवृत्तिरुदेतीत्या
शंक्य निराकरोति नित्येति॥ शुद्धपदेनाविद्यादिदोषराहित्यं बुद्धपदेन स्वप्रका
शस्वरूपत्वेन जाड्यादिकं व्यवच्छिद्यते। मुक्तपदेन सर्वोपाधिराहित्यं सत्यमि

वे.
३६

त्यविनाशित्वस्वभावत्वं परमानंदपदेन वैषयिकमनुष्यानंदादिचतुर्मुखब्रह्मानंदपर्यंता
नां कर्मजन्यत्वेन सातिशयत्वेन क्षयिष्णुत्वेन च तुच्छत्वात्तेभ्यो विलक्षणं निरतिशया
नंदस्वरूपत्वं प्रतिपाद्यते अनंतपदेन घटादिवत्परिच्छेदराहित्येन देशतः कालतो
वस्तुतश्चापरिच्छिन्नत्वं बोध्यते। अद्वयमिति नानात्वनिषेधेन एकत्वं बोध्यत इत्य
र्थः। ननु यथा दीपप्रभा आदित्यमंडलं न व्याप्नोति। न च प्रयोजनमस्ति। नित्य
शुद्धस्वप्रकाशमात्मानं जडा चित्तवृत्तिः कथं विषयीकरोतीति। किंप्रयोजनं चेत्या
शंक्याह। सा तु चित्प्रतिबिंबसहिता सती प्रत्यगभिन्नमज्ञातं परब्रह्म विषयी
कृत्य तद्गताज्ञानमेव बाधते सा चित्तवृत्तिः। न शुद्धं ब्रह्म विषयिणी किंतु अ
ज्ञानविशिष्टप्रत्यगभिन्नं परब्रह्म विषयिणी सा च चैतन्यप्रतिबिंबसंवलिता ३६
सती चैतन्यगतमज्ञानं निवर्तयति। तस्याश्चैतन्यावरकाज्ञाननिवृत्तिरेव प्रयो
जनमित्यर्थः। नन्वधिकारिणस्तत्त्वमस्यादिश्रवणोत्पन्नाखंडचैतन्यवृत्त्यात

दाश्रिताज्ञाने निवारितेऽपि तत्कार्यस्य सकलचराचरप्रपंचस्य प्रत्यक्षतया भासमानत्वा
त्कथमद्वैतसिद्धिरित्याशंक्य कारणाज्ञाननाशे तत्कार्यसकलप्रपंचनाशाद्द्वैतसिद्धि द
रित्येतत्सदृष्टांतमाह। तदा पटकारणतंतुदाहे पटदाहवत् अखिलकारणेऽज्ञाने बा वे
धिते सति तत्कार्यस्याखिलस्य बाधितत्वात्तदंतर्भूताखंडाकाराकारिता चित्तवृत्तिरपि
बाधिता भवति। नन्वज्ञाननाशेन तत्कार्यप्रपंचस्य नाशोऽस्तु तथाप्यखंडाकारवृत्तेर
निवृत्तेरद्वैतहानिरित्याशंक्याह। तदंतर्भूतेति। अखंडाकारवृत्तेरपि। अज्ञानतत्का
र्यांतर्भूतत्वात्तन्निवृत्तेर्नाद्वैतहानिरित्यर्थः। ननु तथास्यखंडाकारवृत्तिप्रतिबिंबित पी
स चैतन्याभासत्वात्कथमद्वैतसिद्धिरित्याशंक्याह। तत्र प्रतिबिंबितं चैतन्यमपि यथा दी
पप्रभा आदित्यप्रभावभासनासमर्था सती तयाभिभूता भवति। तथा स्वयंप्रकाश
मानप्रत्यगभिन्नपरब्रह्मावभासनानर्हतया तेनाभिभूतं सत्स्वोपाधिभूताखंडवृ
त्तेर्बाधितत्वाद्दर्पणाभावे मुखप्रतिबिंबस्य मुखमात्रत्ववत्प्रत्यगभिन्नपर

वे·सा
टी·
४०

ब्रह्ममात्रं भवतीति वृत्तिनिवृत्तौ तत्प्रतिबिंबितचैतन्यस्य बिंबावभासे सनाममर्थत्वाद्वृ
त्त्युपाधिबाधेन तत्प्रतिबिंबचैतन्यमपि चैतन्यमात्रतयावशिष्यते दर्पणाभावे प्रतिबिंबग
मेतत्प्रतिबिंबितसुखाभासस्य बिंबभूतसुखमात्रतावशेषवदित्यर्थः॥ ॥
ते अयं भावः॥ ॥शोधितत्वंपदार्थस्याधिकारिणस्तद्विजृंभितगुरुशास्त्रादिभ्यः
तत्त्वमसीत्युपदेशेन अहं नित्यबुद्धमुक्तसत्यपरमानंदाद्वयाखंडब्रह्मास्मीति चि
त्तवृत्तिरुदयमासादयति· तदानीमेव तस्याभिव्यक्ताखंडचैतन्यबलेन तत्त्वपरिपी
डिताज्ञानं नाशो भवति· तदानीं तत्कार्यस्य सर्वस्य नाशाद्दभिव्यक्तिरपि स्वयमेवक
तकरजोवद्दारुमथनजनिताग्निवदुदरस्थदुष्टजलशांत्यर्थं पीतजलवच्च न
श्यति· तदानीं तद्वृत्तावासीत्स्वोपाधिभूतवृत्तिनाशात्स्वप्रकाशात्मावभासना ४०
मु समर्थतया दर्पणविगमे तदुपाधिकस्य स्वाधिष्ठानसुखमात्रत्ववदधिष्ठानमात्रो भ
वतीति वेदांतसिद्धांतरहस्यमपि तितस्यानुभवः लोकांश्च भांतिपरमे मतिमोहजन्याः
द

स्यु

नी स्वप्नेंद्रजालमरुनीरसमाचिचाः व्युत्थानकाल इह न स्फुरणं विशुद्धप्रत्यक्सुखाब्धिपरमामृतचित्त धि
वृत्तौ॥१॥ मत्तः परं न खलु विश्वमथापि भाति मय्येव पूर्वमपरं नरशृंगतुल्यं। मायोत्थशास्त्रगुरुवा
क्यसमुत्थबोधभानुप्रभाविलसिते कुगतं न जाने।२॥ निरतिशयसुखाब्धिसुप्रकाशे परेस्मिन्क धि
कृ.फ. थमिदमविवेकादुत्थितं स्वकल्पणी वर्धगतमधुना तद्देशिको वा श्रुतिर्वा परमविमलबोधेप्येकथि धु
न लेहं जाने॥३॥ नद्येतत्सर्वं मनसि निधायोपसंहरति· प्र●त्यगभिन्नेति· ननु मनसैवानुद्रष्टव्यं मनसैवे
दमाप्तव्यं। दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः।बुध्याह्योक नसाध्येस्मिन्वस्तून्यस्तमि
तापरि· बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव इत्यादिश्रुतिस्मृतीनां। यतो वाचो निवर्तंते अप्राप्य म
नसा सह। यन्मनसा न मनुते· अन्यदेव तद्विदितादथो अविदितादधि· अविज्ञातं विजानतां विज्ञातमवि
जानतां अनाशिनो प्रमेयस्य। यद्धि ज्ञानं त्वया विप्र पन्नमात्मना ताभ्यां मत्परं विद्धि। यद्दे धे[illegible]मि
त्यादिश्रुतिस्मृतीनां च परस्परविरोधमाशंक्य परिहरति· एवं च सति मनसैवानुद्रष्टव्यं मनसा न
मनुत इत्यनयोर विरोध एवमुक्तप्रकारेण अज्ञातचैतन्यस्य वृत्तिव्याप्यत्वांगीकारेण फलव्याप्यत्वस्य न्य
निषिद्धत्वे सहनीयर्थः।तदेवाह· वृत्तिव्याप्यत्वांगीकारेण फलव्याप्यत्वप्रतिषेधप्रतिपादनात् अंतःक

वेदां [illegible]स्यात्र नि[illegible]स्त[illegible]वृत्त्यर्थमज्ञानावच्छिन्नचैतन्यं प्राप्नोतीत्येतद्वृत्तिव्याप्यत्वमंगीक्रियते आवरणभंगा
र्थं [illegible]प्रकाशमानत्वेन चैतन्यं फलचैतन्यमित्युच्यते तस्मिन्फलचैतन्ये [illegible]अ
वरणभंगस्य प्रागेव जातत्वेन प्रयोजनाभावादित्यर्थः। अस्मिन्नर्थे ग्रंथांतरसं[illegible]।
४१ प्यत्वमेवास्य शास्त्रकृद्भिर्निवारितं ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षितेति वृत्तिप्रतिबिंबितचैतन्या
भासस्यापि फलचैतन्यप्रकाशकत्वेनेत्यत्रापि संमतिमाह· स्वयंप्रकाशमानत्वान्नाभास उपयुज्यत
इति च जडपदार्थाकाराकारितचित्तवृत्तेर्विशेषोस्ति· इदानीं जडपदार्थविषयकचित्तवृत्तेर्ब्रह्माकारवृ
त्त्यपेक्षया वैलक्षण्यं दर्शयितुमाह· जडपदार्थेति अहं ब्रह्मास्मीत्यनुसंधानावच्छिन्न ब्रह्माकारा वृत्ति
स्तदावरकमज्ञानमात्रं निवर्तयति· ब्रह्म तु स्वप्रकाशात्मत्वात्स्वयमेव प्रकाशते न तु वृत्तिप्रतिबिंबितचि
दाभासेन चैतन्यं प्रकाश्यते। तत्र तस्यासमर्थत्वात्· अहं घट इति घटाकाराकारिता चित्तवृत्तिस्तु घटावच्छि
न्नचैतन्यावरकाज्ञानं विवर्तमानास्वप्रतिबिंबितचिदाभासेन जडं घटमपि प्रकाशयति· अतस्तत्तो घ
विशेषोस्तीत्यर्थः। एतदेव प्रपंचयितुं प्रतिजानीते· तथाहीति· अयं घट इति कटाकाराकारितचित्तवृ ४१
त्तिरज्ञातं घटं विषयीकृत्य तद्गताज्ञाननिरसनपुरःसरं स्वगतचिदाभासेन जडं घटमपि भासयति जडपदा
र्थविषयिणीं चित्तवृत्तिमभिनीय दर्शयति·॥ ॥अयमिति॥ ॥वृत्तिसंबंधात्प्राग्घटस्याज्ञात
त्वादज्ञातं घटं विषयीकृत्य प्रवृत्ता चित्तवृत्तिर्घटगताज्ञानं दूरीकृत्य घटमपि भासयतीत्यर्थः। अस्मिन्नर्थे

वृद्धसंमतिमाह· तदुक्तं बुद्धितत्स्थचिदाभासौ द्वावपि व्याप्नुतो घटं तत्राज्ञानं धियानश्येदाभासेन घटः स्फुरे
त्॥१॥ बुद्धिश्च तत्र बुद्धौ प्रतिबिंबितचिदाभासश्च बुद्धितत्स्थचिदाभासौ द्वावेतौ बुद्धिचिदाभासौ घटं व्या
प्नुतः तत्र तयोर्मध्ये धिया वृत्त्या घटगताज्ञानं नश्येत् चिदाभासेन तु घटः स्फुरेदित्यर्थः॥ ॥अत्रानुरूपं
दृष्टांतमाह·॥ ॥यथा दीपप्रभामंडलमंधकारगतं घटपटादिकं विषयीकृत्य तद्गतांधकारनिरस
नपुरःसरं स्वप्रभया तदपि भासयतीति। यथा अंधकारावस्थितघटादिकं विषयीकृत्य प्रवर्तमानं दीपप्रभा
मंडलमंधकारगतं घटपटादिकं विषयीकृत्य तद्गतांधकारनिरसनपुरःसरं स्वप्रभया तदपि भासयती
ति· यथांधकारावस्थितं घटादिकं विषयीकृत्य प्रवर्तमानं दीपप्रभामंडलं घटावरकांधकारं
निवृत्तिद्वारा स्वप्रभया घटादिकं प्रकाशयति तद्वदित्यर्थः। इयता ग्रंथजालेन प्रतिपादितस्य प्रत्यगभिन्न स
स्यानंदाखंडचैतन्यस्य साक्षात्कारलक्षणामखंडाकारांतःकरणवृत्तिं प्रतिपादयितुं मुमुक्षुस्तत्साधन[illegible]
तश्रवणादेरवश्यानुष्ठेयत्वं तेषां लक्षणानि च क्रमेण दर्शयति· एवंभूतेत्यादिना द्वैतं [illegible]भासते [illegible]
तेन एवंभूतस्य स्वस्वरूपचैतन्यसाक्षात्कारपर्यंतं श्रवणमनननिदिध्याससमाध्यनुष्ठान[illegible]
[illegible]णामपा[illegible]ड्गिधलिंगैरशेषवेदांतानामद्वितीयवस्तुनि [illegible]उपक्रमो
पसंहारा[illegible]र्थवादोपपत्त्याख्यानि [illegible]तदाद्यंतयोरुपपादनमुपक्रमो

वे॰ पसंहारौ यथा छांदोग्ये षष्ठाध्याये प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुनः । एकमेवाद्वितीय
५२ मित्यादौ ऐतदात्म्यमित्यंते च प्रतिपादनं । प्रकरणप्रतिपाद्यस्य तन्मध्ये पौनःपुण्येन प्रतिपादनं
अभ्यासः यथा तत्रैवाद्वितीयवस्तुनि मध्ये तत्त्वमसीति नवकृत्वः प्रतिपादनं प्रकरणप्रति
पूर्व पाद्यस्याद्वितीयवस्तुनः प्रमाणांतराविषयीकरणं अपूर्वता यथा तत्रैवाद्वितीयवस्तु
नो मानांतराविषयीकरणं । फलं तु प्रकरणप्रतिपाद्यस्यात्मज्ञानस्य तदनुष्ठानस्य ष्ठान ५
वा तत्र श्रूयमाणं प्रयोजनं यथा तत्र आचार्यवान् पुरुषो वेद तस्य तावदेव चिरं याव
न्न विमोक्ष्ये ऽथ संपत्स्य इत्यद्वितीयवस्तुज्ञानस्य तत्प्राप्तिः प्रयोजनं श्रूयते प्रक ५२
रणप्रतिपाद्यस्य तत्र तत्र प्रशंसनमर्थवादः यथा तत्रैवोत तमादेशमप्राक्ष्यो येनाश्रु
मित्य तं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्यद्वितीयवस्तुप्रशंसनं प्रकरणप्रतिपाद्यार्थ
साधने तत्र श्रूयमाणा युक्तिरुपपत्तिः । तत्र यथा सोम्यैकेन मृत्पिंडेन सर्वं मृन्मयं
विज्ञातं स्याद्वाचारंभणमात्रत्वे युक्तिः श्रूयते । मननं तु श्रुतस्याद्वितीयवस्तुनो वेदांता

नुगुणयुक्तिभिरनवरतमनुचिंतनं विजातीयदेहादिप्रत्ययरहिताद्वितीयवस्तुसजाती
यप्रत्ययप्रवाहो निदिध्यासनं समाधिर्द्विविधः सविकल्पको निर्विकल्पकश्चे
ति तत्र सविकल्पको नाम ज्ञातृज्ञानादिविकल्पलयानपेक्षयाद्वितीयवस्तुनि
तदाकाराकारितायाश्चित्तवृत्तेरवस्थानं तदा मृन्मयगजादिभानेऽपि मृद्भानवत् न
द्वैतभानेऽप्यद्वैतं वस्तु भासते एवंभूतस्योक्तश्रुतिषु तदनुभवैर्निरस्तस
मस्तोपाधिप्रत्यगभिन्नपरमानंदचिद्रूपस्य साक्षात्कारपर्यंतं श्रवणादी
न्यनुष्ठेयानीति प्रतिजानीते ॥ तेपीति श्रवणादयोपीत्यर्थः ॥ ॥

श्रवणस्यलक्षणमाह॥ षड्विधेति लीनमर्थं गमयतीति लिंगं षड्विधस्य व्युत्पत्तेः ब्रह्मात्मैकत्वनिश्चाय
कैरुपक्रमोपसंहारादिषड्विधलिंगैः सर्वेषांवेदांतवाक्यानामद्वितीयेब्रह्मणितात्पर्यनिश्चयः श्र
वणमित्यर्थः। तानिचलिंगानिक्रमेणोपदिशति उपक्रमेति॥ तथाचोक्तं। उपक्रमोपसंहाराव
भ्यासोऽपूर्वताफलं अर्थवादोपपत्तिश्च लिंगं तात्पर्यनिर्णयइति उपक्रमोपसंहारौ तावद्दर्शय
ति। प्रकरणप्रतिपाद्यस्येति। तदुदाहृत्य दर्शयति। यथेति। एकमेवाद्वितीयमित्युपक्रमस्य ऐत
दात्म्यमिदं सर्वमिति प्रतिपादनमुपक्रमोपसंहारावित्यर्थः। अभ्यासस्यलक्षणमाह। पौनःपु
न्येनेति। अत्रापिश्रुतिमुदाहरति। यथेति। अपूर्वत्वस्यलक्षणमाह। प्रमाणांतरेति। तत्वौप
निषदं पुरुषं पृच्छामीत्यादिश्रुतिभिरुपनिषन्मात्रवेद्यत्वप्रतिपादनाद्ब्रह्मणोऽपूर्वत्वमित्यर्थः।
अथवा ब्रह्मणः स्वप्रकाशत्वेन स्वव्यवहारे स्वातिरिक्तप्रमाणानपेक्षत्वाद्ब्रह्मणोऽपूर्वत्वमित्यर्थः।
क्रमप्राप्तस्य फलस्यलक्षणमाह। फलमिति। अत्रानुरूपमुदाहरणमाह। आचार्यवानित्यादि॥
श्रवणादिसाधनानां ब्रह्मात्मैकत्वविज्ञानं प्रयोजनं ब्रह्मज्ञानस्य तत्प्राप्तिः फलं ब्रह्मवेदब्र
ह्मैव भवति॥ तरति शोकमात्मविदित्यादिश्रुतिरित्यर्थः। पंचमलिंगस्यार्थवादस्यलक्षण

माह।प्रशंसनमिति प्रकरणप्रतिपाद्याद्वितीयब्रह्मस्वरूपस्तावकवाक्यमर्थवाद इत्यर्थः।अत्रा
४४ पिश्रुतिमाह।उततमादेशमित्यादि येनाश्रुतंश्रुतं भवतीति येन सकलप्रपंचाधिष्ठानब्रह्मस्व
रूपश्रवणेनाश्रुतंप्रपंचजातमपिश्रुतंभवति।येन ब्रह्मज्ञानेनाज्ञातंसर्वंजगज्ज्ञातंभवति
येन ब्रह्मसाक्षात्कारेणासाक्षात्कृतंसाक्षात्कृतंभवति ब्रह्मणः सर्वतः संप्लुतोदकस्थानीयत्वा
दित्यर्थः।अवशिष्टाया उपपत्तेर्लक्षणमाह।युक्तिरिति तामुदाहरति।यथेति।मृद्विकारेषुघटा
दिषुविकारनामधेययोर्वाचारंभणमात्रत्वेन यथामृत्वमेवावशिष्यते नान्यत्तथाचिद्विवर्तस्य
प्रपंचस्यगिरिनदीसमुद्रात्मकविकारनामधेययोर्वाचारंभणमात्रत्वाच्चिन्मात्रमेवावशिष्यते
रज्जुविवर्तस्यसर्पस्य रज्जुमात्रावशेषवदित्यर्थः।श्रवणनिरूपणानंतरं तदुत्तरांगस्यमननस्य
लक्षणमाह।मननं त्विति।षड्विधलिंगतात्पर्यपूर्वकंश्रुतस्याद्वितीयब्रह्मणोवेदांताविरोधिनी
भिर्युक्तिभिर्निरंतरमर्थेणानुचिंतनंमननमित्यर्थः।निदिध्यासनलक्षणमाह।विजातीयेति।विजा ४४॥
तीयदेहादिबुध्यंतजडपदार्थनिराकरणेन सजातीयाद्वितीयवस्तुविषयकप्रत्ययप्रवाहीकरणंनि
दिध्यासनमित्यर्थः।व्युत्थानविरोधसंस्कारयोरभिभवप्रादुर्भावे सतिचित्तस्यैकाग्रतापरिणामः



समाधिः।सचद्विविध इत्याह।सविकल्पकोनिर्विकल्पकश्चतस्यलक्षणमाह।तत्रेति।तत्रतयोः
सविकल्पकनिर्विकल्पकयोर्मध्येसविकल्पकोद्विविधः।अहंब्रह्मास्मीतिशब्दानुविद्धतयाऽद्वि
तीयवस्तुनिचित्तवृत्तेरवस्थानमित्येकः।द्वितीयस्तु।ज्ञातृज्ञानज्ञेयत्रिपुटीविलयानपेक्षयाहंब्र
ह्मास्मीतिशब्दानुविद्धतयाद्वितीयवस्तुनिअविच्छिन्नचित्तवृत्तेरवस्थानमित्यर्थः।ननुभासि
तेपिलक्ष्मीनेन शांतोव्याधिरितिन्यायेनोक्तमविकल्पकैस्समाध्योः सकलभेदनिराकरणाय प्र
वर्तनात्तयोरपि ज्ञात्रादिभेदविषयत्वेननाद्वैतवस्तुमात्रभानंतन्नेत्याशंक्योत्तरमाह।तदेति।तदा
सविकल्पकसमाध्यनुभवकालेज्ञात्रादिभेदप्रतीतावप्यद्वैतंवस्तुभासतएवसुवर्णमयकुंडलादि
भानेसुवर्णभानवन्मृन्मयघटादिभानेमृद्भानवच्च गजादिभानस्यवाचारंभणमात्रत्ववज्ज्ञात्रा
दिभानस्यापिवाचारंभणमात्रत्वादद्वैतमेववस्तुभासत इत्यर्थः।यद्वासर्वंखल्विदंब्रह्म एतदा
त्म्यमिदंसर्वमित्यादिश्रुतिबलात्सर्वमहमितिगिरिनदीसमुद्रात्मकंसर्वंजगत्वाचिद्धंस
च्चिदानंदब्रह्मत्वेनानुभूयतस्यदग्धपटन्यायेनप्रपंचभानेप्यद्वैतंसच्चिदानंदलक्षणंवस्तुभास
तएवेत्यर्थः।तदुक्तं भगवतावासुदेवः सर्वमितिसमहात्मासुदुर्लभ इति मूलकाराप्यस्मिन्

थे ग्रंथांतरसंमतिं दर्शयति। तदुक्तं। दृशिस्वरूपं गगनोपमं परं सकृद्विभातं त्वजमेकमक्ष
रं। अलेपकं सर्वगतं यदद्वयं तदेव चाहं सततं विमुक्तः ॐमिति यत्परं ब्रह्म तदेवाहमित्यन्व
यः॥ किं तदित्याह। दृशिस्वरूपमिति। दृशिर्दृष्टिस्तस्याः रूपं द्रष्टृत्वं तद्यस्य परमात्मस्वरू
पस्य तद्दृशिस्वरूपं साक्षिरूपमित्यर्थः॥ ॥तदुक्तं भगवता॥ ॥उपद्रष्टानुमंता च भर्ता
भोक्ता महेश्वरः परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः पर इति। पुनः किंरूपं तत् गगनो
पमं गगनं उपमा दृष्टांतो यस्य तद्गगनोपमं गगनवन्निर्लेपस्वरूपमित्यर्थः। तथा च भगव
द्वचनं। यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते सर्वत्रावस्थितो देहे तथात्मा नोप
लिप्यत इति। यद्वा गगनोपमं गगनवदमूर्तस्वरूपमित्यर्थः। आकाशशरीरं ब्रह्मेति
श्रुतेः। पुनः किंभूतं॥ सकृद्विभातं सकृदेकदैव विभातं सर्वदैकस्वरूपेण भासमा
नं। वह्न्यादिप्रकाशवन्न वृद्धिक्षयशीलमित्यर्थः। पुनः किंरूपं अजं जन्मरहितं ए
कं नित्यैरस्तसर्वोपाधिभेदं अक्षरं विनाशधर्मराहित्येन कूटस्थमित्यर्थः॥ तथा च

भगवानाह। क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते इति। अलेपकमसंगत्वादविद्यादिदो
षरहितमित्यर्थः। असंगो ह्ययं पुरुष इति श्रुतेः। सर्वगतं सर्वत्र ब्रह्मादिस्थावरांतेषु भूतेषु
गतं व्याप्तमद्वयं सजातीयविजातीयभेदराहित्येन द्वितीयरहितं सततं विमुक्तमिति सर्वदा का
र्यकारणात्मकसर्वोपाधिविनिर्मुक्तत्वेन सततैकरूपमित्यर्थः। तथा च भगवतैवोक्तमु
क्त इति व्याख्या गुणातो मे न वस्तुतः। इति तथा च एतादृशं निरतिशयानंदं यत्परं ब्रह्म त
देवाहमिति भावयतो निषेधशक्तियोगित्वेन तत्तदुपाधिभावात्तत्संयुक्तभेदभानेऽप्यद्वैतभास
नमेवेत्यर्थः। निर्विकल्पकसमाधिस्वरूपमाह। निर्विकल्पकस्तु ज्ञातृज्ञानादिविकल्प
लयापेक्षया अद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरनितरामेकीभावेनावस्थानं
तदा तु जलाकाराकारितलवणानवभासेन जलमात्रमेवावभासते तथास्य सुषुप्तेश्चा
भेदशंका न भवति। उभयत्र वृत्त्यभाने समानेऽपि तत्सद्भावासद्भावमात्रेण तयोर्भेदोपपत्तेः अयं
चाद्विविधः चिरकालाभ्यस्तयदुत्तरमविकल्पकसमाध्येतभवजनितसंस्कारसहकृताया

वासद्राव २

वेदांत. श्रितहते सां नादि त्रिपुटीलयपूर्वकमद्वैतवस्तुन्येकभावनात्मकः प्रथमः ॥ एतस्मिन् विकल्प
४६ कसमाध्यभ्यासपाटवेन लुप्तसंस्कारतया ज्ञात्रादि त्रिपुटीलयपूर्वकमखंडाकाराका
रितायाश्चित्तवृत्तेर्विनापि स्वस्फूर्तिं केवलचिदानंदात्मनावस्थानात्मको द्वितीयः ॥ त
द्द्वितीयंपक्षमभिप्रेत्याह ॥ ज्ञात्रज्ञानादीति. नन्वेवंसमाधिसुषुप्त्यो विक्षेपाभावे
नवृत्त्यभानादभेदमाशंक्य परिहरति. ततश्चेति तत्र युक्तिमाह उभयत्रेति समाधि
सुषुप्त्योरित्यर्थः ॥ तत्सद्भावेति. समाधावज्ञायमानवृत्तिसद्भावात् सुषुप्तौ वृत्त्य
भावाश्चतयोर्भेदोपपत्तेरित्यर्थः ॥ उक्तसमाधेः साधनापेक्षायामाह. अस्यांगा
नियमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयः तानि च । सा ४६
धनानि क्रमेणोद्दिशति. यमेति. यमाद्यष्टांगानि समाधेरंतरंगसाधनानीत्यर्थः
प्रथमंयमस्यलक्षणमाह. तत्राहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः तेषु य
माद्यष्टांगेषु मध्ये हिंसादयः पंचयमा अवश्यानुष्ठेया इत्यर्थः । तदनंतरं नियमाना

ह. ॥ शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः शौचादयः पंचनियमा इत्य
र्थः ॥ आसनंलक्षयति. करचरणादिसंस्थान विशेषल क्षणानि पद्मकस्वस्तिकादी
नि प्राणायामलक्षणमाह. रेचकपूरककुंभकलक्षणाः प्राणनिग्रहोपायाः प्राणायामाः
इडया पूरयेद्वायुं मुंचेद्दक्षिणयानिलं यावत्श्वासं समासीनः कुंभयेत् सुषुम्णया या
यदादी योगी पद्मासनउपविश्य योगमभ्यस्यति. तदा गुल्फाभ्यां गुदमूलं निष्पीड्य खेच
रीमुद्रासाहाय्येन प्राणधारणाया सुषुम्नामार्गेण मूलाधारात् कुंडलिनीमुत्थाप्य स्वाधि स्था
ष्ठानमणिपूरानाहत विशुद्धाज्ञानिर्वाणाख्य षट्चक्रभेदक्रमेण सहस्रदलकमलकर्णि
कायां विद्यमान परमात्मना सह संयोज्य तत्रैव चित्तं निर्वाणे न दीपवद् चलं कृत्वा स्वात्मानं
दर्शयित्वेत्येतत्प्राणायामफलं स च द्विविधः ॥ अगर्भः सगर्भश्चेति तत्र मंत्रं विना प्राणाया
वायुं मात्राहीनमनन्यधीः पूरयेद्वामयातद्कुंभयेच्च सुषुम्णायां पीत्वा संजितश्वासोऽभ या
वेन्मासात् जितेंद्रिय इति । प्राणवेचाररहित्येन उक्तरेचकपूरककुंभकक्रमेण प्राणानि

निरोधो गर्भप्राणायामः। रेचके तोऽयमेन लक्षेयुण्येन मरयेत कुंभये च तुरं यथा प्रण
[illegible] शश्चयावम नसा [illegible] युक्ति यत्
क्षिप्र रव्यारके प्रेण वंमनसासमुच्चरं वामया वायुमाहूर्य चतुः षष्टिस रव्या [illegible]
[illegible] नसा जपन् तदर्थंच अकारोकारम कारमात्रात्मकं सार्धत्रिवलयाकार कुं
डलिनीरूपं चिदानंदकंदं चमूलाधारादि ब्रह्मरंध्रांतं अनुसंदधत् सुषुम्णाया
चित्तमपि तदेकप्रवणं कुर्वन्नुपयोवच्छ्रू संकुंभयेत् तदुक्तमाचार्यैः षोडशतद्द्विगुण
चतुःषष्टिमात्राणि च तानि चक्रमशः रेचक पूरक कुंभक भेदैः ५ त्रिविधः प्रभं

इति प्राणायाम ३ जनायामप्रकारः। क्रमप्राप्तं प्रत्याहारं निरूपयति इंद्रियाणां स्व स्व विषयेभ्यः प्रत्या
हरणं प्रत्याहारः श्रोत्रादीनां इंद्रियाणां स्वस्वविषयेभ्यः शब्दादिभ्यः सकाशात्तपा ४७
षाणोपरि प्रयुक्त शरसंघातस्तद्वत् प्रत्यावर्तनं प्रत्याहारः। नन्विंद्रियाणां स्व स्व

द्रियाणां विषयेभ्यो निवर्तनं प्रत्याहार इत्युक्तं तंन संभवति शब्दादिविषयाणां सुखसाधन
त्वेन वैषयिकसुखव्यतिरिक्त निरतिशयानंदसद्भावे प्रमाणाभावात् हैरण्यगर्भाद्यमृतभो
गस्य भूयस्त्वा पित्यक्तुमशक्यत्वादिति चेत् न। मूढैः कर्मजडैर्विषयलंपटैस्त्यक्तुमशक्यत्वे
पि सुद्धांतःकरणेन संसारविद्यकत्वदर्शिना विषयदोषदर्शनेन बुद्धीकृत शब्दादिवि
षयप्रपंचेन पुरुषोत्तमेन त्यक्तुं शक्यत्वात् अन्यथा संसार एव लोलुप्येन तस्मात्तन्यास
मेषां तपसाम तिरिक्तमाहुः एतमेव लोकमीप्संतः प्रव्राजिनः प्रव्रजंति एतत्सर्वं भूः स्वा
हेत्यप्सु परित्यज्य आत्मानमन्विछेत् त्यागेनैके अमृतत्वमानशुः ब्रह्मचर्यादेव प्रव्र
जेत् यदहरेव विरजेत् तदहरेव प्रव्रजेत् वनाद्वा गृहाद्वा। सर्वधर्मान्परित्यज्य मामेकं शरणं
व्रज इति संसारमेवं निस्सारं दृष्ट्वा सारदिदृक्षया प्रव्रजंत्यकृतोद्वाहाः परं वैराग्य
माश्रिताः। प्रत्यग्विविदिषा सिद्धौ वेदानुवचनादयः। ब्रह्मावाप्त्यै कृते त्यागमीप्सं

वे.टी. तीति श्रुतेर्बलात् इत्यादिश्रुतिस्मृतिभिः तथा आनंदो ब्रह्मेति व्यजानात् एतस्यैवा
नंदस्यान्यानि भूतानि मात्रामुपजीवंतीति एषास्य परमानंद [illegible] यदेष
४८ आकाश आनंदो न स्यात् आनंदाद्ध्येव खल्वित्यादिश्रुतिभिर्नित्यसुख
[illegible]स्य प्रतिपादितत्वात् शब्दादिवैषयिकसुखव्यतिरिक्तनित्यनिरतिशयानंदस
द्भावे प्रमाणाभावादित्येतदपि निरस्तं बोद्धव्यं संप्रति धारणां लक्षयति अद्विती
यवस्तुन्यंतरिंद्रियावधारणं धारणा सर्वेषां बुद्धिसाक्षितया विद्यमाने वस्तुनि
। न चित्तनिक्षेपणं धारणेत्यर्थः। धारणापाटवाभावेन चित्तस्थैर्याभावात् अद्वि
तीयवस्तुनि विच्छिन्नविच्छिद्य चित्तवृत्तिप्रवाहीकरणं ध्यानमित्याह तत्राद्वितीय ४८
वस्तुनि विच्छिद्य विच्छिद्यांतरिंद्रियप्रवाहो ध्यानं समाधिरुक्त एव सविकल्पकः
स्मर्तव्य इत्याह समाधिस्तूक्तः सविकल्पक एव उक्तयमाद्यष्टांगसहितनि

र्विकल्पकसमाधेर्निर्विघ्नानुष्ठानसिध्यर्थं विघ्नज्ञानव्यतिरेकेण निवारणस्य कर्तु
मशक्यत्वादस्य चतुरो विघ्नान्संदर्शयति एवमस्यांगिनो निर्विकल्पकस्य लयवि
क्षेपकषायरसास्वादलक्षणाश्चत्वारो विघ्नाः संभवंति तत्राद्यं विघ्नं लक्षयति
लयस्तावदयो द्विविधः चिरकालमुक्ताष्टांगसहितनिर्विकल्पकसमाध्यभ्या
सपाटवेनातितप्तलोहतप्तक्षिप्तजलबिंदुवत्तैलरहितस्मितदीपकलिकावत्प्रत्य
गभिन्ने परमानंदे चित्तवृत्तेर्लयः प्रथमः द्वितीयस्तु मूर्छावस्थावत् आलस्येन चि
त्तवृत्तेर्बाह्यशब्दादिविषयग्रहानादरे सति प्रत्यगात्मस्वरूपानवभासनाद्वृ
त्तेस्तब्धीभावलक्षणा निद्रारूपः तत्राद्यमंगीकृत्य द्वितीयस्य विघ्नत्वेन त्यागा
यतत्कुलमस्याह अखंडवस्त्वनवलंबनेन चित्तवृत्तेर्निद्रा॥ द्वितीयं विघ्नमाह अ
खंडवस्त्वनवलंबनेन चित्तवृत्तेरन्यावलंबनं विक्षेपः। अखंडवस्तुग्रहणायांतर्मु

वे॰ खंडतयाप्रवृत्तायाश्चित्तवृत्तेश्चिदानंदवस्त्वनवलंबनेन वस्तुपक्षिवत्पुनर्बाह्यविषयग्रहणा
४२ यप्रवृत्तिर्विक्षेपइत्यर्थः॥ तृतीयं विघ्नमाह॥ ॥लयमविक्षेपाभावेपिचित्तवृत्तेः रा
गादिवासनया स्तब्धीभावादखंडवस्त्वनवलंबनं कषायः रागादिरूपास्त्रिविधाः बा
ह्याः आभ्यंतराः वासनामात्ररूपाश्चेति बाह्याः पुत्रादिविषयाः आभ्यंतरास्तु
राज्यादयः संस्कारतयावासनामयाः तत्रानेकजन्माभ्यस्तबाह्यांतररागादिभ
वजनितसंस्कारैः कलुषीकृतं चित्तं कथंचित्श्रवणादिसाधनेनांतर्मुखम
[illegible] ४ पि चैतन्यग्रहणसामर्थ्याभावान्मध्यएवस्तब्धीभवति यथा राजदर्शनायस्वगृ
हान्निर्गत्य राजमंदिरं प्रविष्टस्यापि चतुरूपस्य द्वारपालनिरोधेन स्तब्धीभावश्च त धी
कस्य ३ थापरित्यक्तबाह्यविषयस्याखंडवस्तुग्रहणायप्रवृत्तस्यापि दृढरागादिसंस्का
स्तब्धी रैः स्तब्धीभावादखंडवस्त्वग्रहणं कषाय इत्यर्थः॥ ॥चतुर्थं विघ्नमाह॥ ४९

अखंडवस्त्वनवलंबनेनापि चित्तवृत्तेः सविकल्पकानंदास्वादनं रसास्वादः उक्तमविक
ल्पकसमाध्योर्मध्ये द्वितीयशब्दानंतु विद्वन्त्रिपुटीविशिष्टस्तस्मिन् यआनंदो
बाह्यशब्दादिविषयप्रपंचपरित्यागप्रयुक्तोनतु चैतन्यप्रयुक्तः यथा निधिग्रहणा
यप्रवृत्तस्य निधिपरिपालकभूतपेताद्याहृतस्य निधिप्राप्त्यभावेपि भूतान्यनिष्टनि
पाम वृत्तिमात्रेणाकेपि महानानंदो भवति तथा सविकल्पकसमाधावखंडवस्त्वनवलंब
ने। ननित्यानंदरसास्वानंदनाभावेपि अनिष्टबाह्यप्रपंचनिवृत्तिजन्यानंदं स
विकल्पकरूपं ब्रह्मानंदभ्रमेणास्वादयति तद्रसास्वादनमित्यर्थः। लक्षणां
तरमाह॥ समाध्यारंभसमयेसविकल्पकानंदास्वादनंवा निर्विकल्पकसमा
ध्यारंभकाले तु भूत्वमान सविकल्पकानंदव्याप्तसमहित्वा तत्रयाथु नरतस्येश
स्वादनं रसास्वाद इत्यर्थः। प्रोक्तविघ्नचतुष्टयनिवृत्तेः फलमाह॥ अने

के नविघ्नकर्तृत्वेन विरहितं चैतन्यं चित्तं निर्वातदीपवत् अचलं सत् अखंडचैतन्यमात्रमवतिष्ठ
१० ते यदा तदा [illegible] समाधिरुच्यते लयादिविघ्नाभावसहितं चैतन्यं यदा निर्वा
तदीपवद् अचलमखंडचैतन्यमात्रमवतिष्ठते तदा निर्विकल्पकसमाधिरुच्यत इत्यर्थः
लयादिविघ्नसद्भावे तन्निवृत्तिप्रकारं वक्तुं संमतिमाह। तदुक्तं। लये संबोधये
च्चित्तं विक्षिप्तं शमयेत्पुनः। सकषायं विजानीयात्समप्राप्तं न चालयेत्। नास्वाद
येत्सुखं तत्र निःसंगः प्रज्ञया भवेदिति। पूर्वोक्तनिद्रालक्षणलये जाते सति तन्निवृ
ध्या त्यर्थं चित्तं संबोधयेत् चित्तगतजाड्यादिपरित्यागेन चित्तमुद्बोधयेत् उक्तं विक्षे १०
पयुक्तं चित्तं यदा भवति तदा विषयवैराग्यादिना चित्तं शमयेत् बहिर्मुखतां परित्य
ज्यांतर्मुखं कुर्यात् उक्तरागादिकषायसहितं चित्तं यदा भवेत् तदा विजातीयादि
यं रागादिवासनाबाह्यविषयप्रापका न त्वखंडवस्तुप्रापका अतो नेयं समीचीने

क.प्र. ति विविच्य प्रत्यक्प्रवणवासनायाः सकाशादियं निकृष्टा अतस्त्याज्येयमिति
जानीयादित्यर्थः। यदा सम्यग्वस्तुन्यप्राप्तं चित्तं यदा भवति तदा तच्चित्तं क
षायसहितं जानीयात् तच्च चित्तं यावता कालेन रागादिवासनाक्षयसहितं
भवति तावत्कालं तच्चित्तं स्वस्थानान्न चालयेदिति। पूर्वोक्तं सविकल्पके
सं विषयप्रपंचक्षारत्यागजन्यं नास्वादयेन्न तु संवेत्तत्र युक्तिमाह॥
निःसंग इति। यतो निःसंगो वैषयिकसुखदुःखादिसंगरहितः अतः प्रज्ञया
युक्तो भवेत् स्थिरप्रज्ञो भवेदित्यर्थः॥ तदुक्तं भगवता। प्रजहाति यदा कामा
न्सर्वान्पार्थ मनोगतान् आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते [illegible]
समाध्या[illegible]विघ्नाभावविशिष्टं चित्तं [illegible] चिन्मात्रतया अवस्थानं निर्विक
ल्पकसमाधिरित्यर्थः तत्र भगवानाह। यथा दीपो निवातस्थो नेंगते सोपमा

स्मृतेति॰ अथ निर्विकल्पक समाधौ त्वयुत्तरपरिष्कारमार्गेण तथा मल्लिकोत्रिद्विचा
५१ र्यते पंचभूमिकोपेतस्य चित्तस्य भूमिकात्रयपरित्यागेनावशिष्टभूमिकाद्वयं स
चित्र माधिरित्युच्यते ॥ कास्ताः पंचभूमिकाः क्षिप्तं मूढं क्षिप्तमेकाग्रं चित्तमेकाग्रं निरु
द्धं चेति पंच चित्तभूमिकाः तत्रासुरसंपल्लोकशास्त्रदेहवासनासु वर्तमानं क्षिप्तमित्युच्य
ते । निद्रातंद्रादियुक्तं चित्तं मूढमित्युच्यते ॥ कादाचित्कध्यानयुक्तं बहिर्गमनशीलम
पि उक्तक्षिप्ताद्विशिष्टतया विक्षिप्तं चित्तमित्युच्यते । तत्र क्षिप्तमूढयोः समाधित्वशं
कैव नास्ति विक्षिप्ते तु चेतसि विक्षेपांतर्गततया दहनांतर्गतबीजवच्छिन्नस्य सद्य एव वि
नाशात्तदापि न समाधिः । एकाग्रतां पतंजलिः सूचयति ॥ शांतोदितौ तुल्यप्रत्ययौ ५१
चित्तस्यैकाग्रतापरिणाम इति । अस्यार्थः । शांतोऽतीतः । उदितो वर्तमानः प्रत्ययौ म
नवृत्तिः अतीतप्रत्ययो भवतः ॥ तादृश एव चित्तस्य परिणाम एकाग्रतेत्युच्यते ।

एकाग्रताभिवृद्धिलक्षणं समाधिं सूत्रयति॰ सर्वार्थैकाग्रतयोः क्षयोदयौ चित्तस्य परिणामः समाधिरिति रजो
गुणेन चाल्यमानं चित्तं क्रमेण सर्वार्थान्पदार्थान्परिगृह्णाति॰ तस्य रजोगुणानिरोधाय क्रियमाणेन प्रयत्नविशे
षेणाहिने दिने योगिनः सर्वार्थता क्षीयते॰ एकाग्रता चोदेति॰ तादृशश्चित्तस्य परिणामः समाधिरित्यर्थः । अस्य स
माधेरष्टांगेषु । यमनियमासनप्राणायामप्रत्याहाराः पंच बहिरंगानि हिंसादिभ्यो निषेधेभ्यो योगिनं कर्मभ्यो यमयं
ति निवर्तयंतीत्यहिंसादयो यमाः जन्महेतून् काम्यकर्मधर्मान्निवर्त्य मोक्षहेतौ निष्कामधर्मे नियमयंति प्रेरयंती
ति शौचादयो नियमाः यमनियमयोरनुष्ठाने वैलक्षण्यं स्मर्यते यमान्सेवेत सततं न नित्यं नियमान्बुधः । यमान्पत
त्यकुर्वाणो नियमान्केवलान्भजन्निति बुध्या यमनियमौ समीक्ष्य यमबहुलेषु प्रयत्नेषु बुद्धिमनुसंदधीत आस
नप्राणायामप्रत्याहाराख्यानां ध्यानधारणासमाधित्रयं मनोविषयत्वात्संप्रज्ञातसमाधेरंतरंगं यमादिकं तु बहि
रंगं तथा चैकेनापि पुण्येन अंतरंगे प्रथमं लब्धे सति बहिरंगलाभायनातिप्रयासः कर्तव्यः यद्यपि पातंजलिका
भोतिक भूततन्मात्रेंद्रियाहंकारविषयाः संप्रज्ञातसमाधयो बहुधा प्रपंचिताः तथापि तेषामंतर्धानकाशग
मनादिसिद्धिहेतुतया मुक्तिहेतु समाधिविरोधित्वान्नास्माभिस्तत्र आदरः क्रियते तथा चोक्तं वासिष्ठे । श्रीराम
उवाच ॥ ॥ जीवन्मुक्तशरीराणां कथमात्मविदां वर ॥ शक्तयो नेह दृश्यंते आकाशगमनादिकाः ॥ १ ॥ वसिष्ठ उवाच ॥ ॥

वेदांत-टी. अनात्मविदमुष्यसिद्धिजालानिवांछति ॥ द्रव्यमंत्रक्रियाकालयुक्त्याप्नोत्येव राघव ॥ ३ ॥ अनात्मतस्यैषविषय
आत्मज्ञोप्यात्मनात्मदृक् ॥ आत्मनात्मनि संतुष्टो नाविद्यामनुधावति ॥ ४ ॥ ये केचन जगद्भावास्तानविद्या
५२ मयान्विदुः ॥ कथं तेषु किलात्मज्ञस्त्यक्ताविद्यो निमज्जति ॥ ५ ॥ द्रव्यमंत्रक्रियाकालयुक्तयः साधुसिद्धिदाः ।
परमात्मपदप्राप्तौ नोपकुर्वंति काश्चनेति ॥ ५ ॥ आ विषयस्क संप्रज्ञानसमाधिर्वासनाक्षयस्य निरोध
समाधेश्च हेतुः ॥ तस्मात्तत्राक्तः ॥ अथ पंचभूमिकारूपश्चित्तस्य निरोधलक्षणः समाधिर्निरूप्यते । पं
च समाधिं सूत्रयति ॥ व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधलक्षणचित्तान्वयो निरोधः ।
परिणाम इति व्युत्थानसंस्काराः समाधिविरोधिनः ते च निषिद्धहेतुना योगिप्रयत्नेन प्रतिदिनं
प्रतिक्षणं वाभिभूयते ॥ तद्विरोधिनश्च संस्काराः प्रादुर्भवंति तथा सति निरोध एकैकस्मिन्क्ष
णे चित्तमनुगच्छति ॥ सोयमीदृशश्चित्तस्य परिणामो भवति । यदा तदा असंप्रज्ञातसमाधिरु ५२
च्यत इत्यर्थः ॥ एतत्समाधिद्वयं जीवन्मुक्तस्यैव भवति ॥ नान्यस्येति मनसि निधाय प्रथमं जी
वन्मुक्तस्वरूपं प्रतिपादयितुं प्रतिजानीते ॥ अथ जीवन्मुक्तलक्षणमुच्यते ॥ ॥ तस्य लक्षणमाह ॥

जीवन्मुक्तो नामेत्यादिना ब्रह्मनिष्ठ इत्यंतेन जीवन्मुक्तो नाम स्वस्वरूपाखंडब्रह्मज्ञानेन तदज्ञान
बाधनद्वारा स्वस्वरूपाखंडे ब्रह्मणि साक्षात्कृते अज्ञानतत्कार्यसंचितकर्मसंशयविपर्यया
दीनामपि बाधितत्वादखिलबंधरहितो ब्रह्मनिष्ठः अत्राखिलबंधरहितो ब्रह्मनिष्ठो जीव
न्मुक्त इति तस्य लक्षणं जीवतः पुरुषस्याहि कर्तृत्वभोक्तृत्वसुखदुःखलक्षणोखिलोयश्चि
त्तधर्मः सक्लेशत्वपत्वाद्बंधो भवति ॥ तेन रहितः परित्यक्तबंधनः ब्रह्मणि निष्ठा तदेकपरता
यस्य सः ब्रह्मनिष्ठः जीवन्मुक्त इत्यर्थः ॥ सकलबंधराहित्ये हेतुमाह ॥ ॥ स्वस्वरूपेति ॥
गुरुश्रुतिस्वानुभवैर्ब्रह्मात्मैकत्वविज्ञानेन मूलाज्ञानतत्कार्यसंचितकर्मादीनामपि बा
धितत्वात्सर्वसंशयाः क्षीयंते ॥ क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावर इति ॥ नन्वेता
दृशस्य जीवन्मुक्तस्य देहेंद्रियादिभानमस्ति न वेत्याशंक्य दग्धपटन्यायेन इंद्रजाल
निर्मितसाधन्युद्रादिवद्बाधितानुवृत्त्या मिथ्यात्वेन भानेपि परमार्थतया भानं नेत्याह ।
अयमित्यादिना न पश्यतीत्यंतेन ॥ अयं तु व्युत्थानसमये मांसशोणितमूत्रपुरीषादिभाज

नशरीरेणआं॰ध्यमोग्ध्याप्यदृश्यत्वादिभाजनेंद्रियग्रामेणअशनापिपासाशोकसन्निधे
मोहादिभाजनेनांतःकरणेनचसर्वसर्ववासनयासीयमानानिकर्माणिभुज्यमाना।दृनि
ज्ञानंविरुद्धारब्धफलानिचपश्यन्नपिबाधितत्वात्परमार्थतोनपश्यतीत्यर्थः।इंद्रजालमिति
ज्ञानवान्तदिदमिंद्रजालंपश्यन्नपिपरमार्थमिदमितिनपश्यति॥अस्मिन्नर्थेश्रुति
माह॥सचक्षुरचक्षुरिवसकर्णोकर्णइतिश्रुतेः॥आचार्यवचनंप्रमाणयति॥उक्तंच॥
सुषुप्तवज्जाग्रतियोनपश्यतिद्वयंतुपश्यन्नपिचाद्वयत्वतः।तथाचकुर्वन्नपिनिष्क्रियश्चयः
सआत्मविन्नान्यइतीहनिश्चयः॥१॥इहजगतिसएवात्मविन्नान्यइतिमेनिश्चयइत्य
६ न्वयः।सःकइत्यपेक्षायामाह॥यइतियःकोपिमहापुरुषोब्रह्मात्मैकत्वसाक्षात्कारेण
निरस्तसमस्तभेदबुद्धिःसुषुप्तावस्थायांयथाद्वैतंनपश्यतितथाब्रह्मदृष्टिदार्ढ्येनजा ५३
ग्रदवस्थायामपिद्वैतंनपश्यति।तद्दृष्ट्याब्रह्मव्यतिरिक्तजडपदार्थाभावात्सतथोक्तः
किंच॥कदाचिद्व्युत्थानदशायामाविद्यकसंस्कारलेशावेशाद्विक्षेपाटनादिव्यवहारेण

द्वयंपश्यन्नपिसमाध्यभ्याससामर्थ्यावशाद्द्वयत्वेनपश्यतिसचतथोक्तः।यश्चलोकसंग्रहार्थनित्या
दिकर्माणिकुर्वन्नपिआत्मनिकर्तृत्वाभावनिश्चयेननिष्क्रियःकर्मरहितोभवति।कर्मफलेनालि
प्तःसजीवन्मुक्तोनात्रसंशयइत्यर्थः॥नन्वस्यजीवन्मुक्तस्ययोगीश्वरस्यममपुण्यपाप
लेपोनास्तीत्यभिमानवशाद्यथेष्टाचरणप्रसंगमाशंक्यपरिहरति॥अस्यज्ञानात्पूर्वंविद्य
मानानामेवआहारविहारादीनामनुवृत्तिवच्छुभवासनानामेवानुवृत्तिर्भवति।अस्यपूर्वो
क्तजीवन्मुक्तस्यज्ञानात्प्रागेवशांत्यादिगुणैःशुभवासनयानिवारितत्वात्संसारदशाया
मप्रयत्नेनआहारादिप्रवृत्तिवत्तत्त्वज्ञानोत्तरमपिशुभानामेववासनानामनुवृत्तिर्भवतिना
शुभानामित्यर्थः॥ननुशुभवासनानुवृत्तेरपिप्रयोजनाभावात्किंतदनुवृत्त्येत्यतआह॥शुभा
शुभयोरौदासीन्यंवातस्माज्जीवन्मुक्तस्ययथेष्टाचरणप्रसंगोनास्तीतिभावः॥अस्मिन्नर्थे
ग्रंथांतरसंवादयति॥नहि।बुद्धाद्वैतसतत्त्वस्ययथेष्टाचरणंयदि।शुनांतत्त्वदृशांचैव
कोभेदोशुचिभक्षणइति॥जीवन्मुक्तस्यब्रह्मज्ञानत्वाभिमानोनास्तीत्यत्रापिसंमतिमाह॥

ब्रह्मवित्त्वं यथामुक्त्वा स आत्मज्ञो नचेतर इति॥ ननु विदुषां यथेष्टाचरणप्रसंगो नास्तीत्युक्तं। त
दनुपपन्नं॥ नमातृवधेन न पितृवधेन यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते॥ हत्वापि स इ
मांल्लोकान्न हंति न निबध्यत इति॥ हयमेधशतसहस्राण्यथ कुरुते ब्रह्महत्याघातलक्षा
णि कुर्वन्नपि न लिप्येत यद्येकत्वं प्रपश्यति॥ सभयाद्दृश्ययं प्राप्तस्तदर्थं यितत्त्वपः। सपु
नः सभयं गंतुमुक्तं च श्वेल्लही छति॥ आरब्धकर्मनानात्वाद्बुद्धानामन्यथान्यथा। वर्त्तने
तेन शास्त्रार्थे विश्रांतव्यं न पंडितैरित्यादि श्रुतिस्मृत्यादि युक्तवाक्यैः विदुषां यथेष्टा
चरणत्वांगीकारादिति चेन्न त्वं तेषां वचनानां विद्वत्स्तुतिपरत्वेन तत्कर्त्तव्यमित्यर्थात
स्यार्थाभावात्॥ तदुक्तमाचार्यैः अधर्माज्जायतेऽज्ञानं यथेष्टाचरणं ततः॥ धर्मकार्ये क
थं तत्स्यात् यत्र धर्मो विनश्यति इति नन्वेवममानित्वमदंभित्वमहिंसा क्षांतिरार्जव
मित्यादि स्मृत्युक्तसाधनस्याद्वेष्टा सर्वभूतानामित्यादिवचनैः प्रतिपाद्यमाना

वे
५५ द्वेष्टृत्वादिगुणसमूहस्य विद्वत्संन्यासे पश्चान्मननश्रवणाभ्यासेन सह विरोधमाशंक्य अमा
नित्वादिसंपादनस्य च विविदिषासंन्यासविषयत्वात् ... प्रांतलक्षणत्वेनालंकार
वदनुवर्तनान्न विरोध इत्याह ॥ तदानीममानित्वादीनि ज्ञानसाधनानि अद्वेष्ट्टृ
दयः सद्गुणाश्चालंकारवदनुवर्तंते जीवन्मुक्तावस्थायामित्यर्थः ॥ अस्मिन्न
र्थे वार्तिकसंमतिमाह ॥ तदुक्तं ॥ उत्पन्नात्मावबोधस्य ह्यद्वेष्टृस्य विद्वत्संन्या
सिनो जीवन्मुक्तस्य ह्यद्वेष्टृत्वादयो गुणाः अयत्नतो भवंत्यस्य न तु साधन
रूपिण इति ॥ अस्य विद्वत्संन्यासिनो जीवन्मुक्तस्य अद्वेष्टृत्वादयो गुणाः अप्रय
त्नेन स्वत एव भवंति न तु साधनरूपिणः ॥ तत्प्रति ते साधनरूपा न भवंति तत्र हेतु ५५
माह ॥ उत्पन्नेति ॥ यत उत्पन्न आत्मावबोधो ब्रह्मात्मैकत्वनिश्चयरूपः । ततस्त

स्य ते गुणाः लक्षणत्वेनैव भवंतीत्यन्वयः ॥ इयता प्रतिबंधेन प्रतिपादितेऽस्मिन्वेदांतसा
राख्ये ग्रंथे श्रीमत्परमगुरुपरमहंसपरिव्राजकाचार्यसदानंदयोगींद्रमहापुरुषेणा
थ वेदांतो नाम सारस्य साधनचतुष्टयसंपन्नस्य प्रमातुरधिकारिणः मूलाज्ञाननि
वृत्तिपरमानंदप्राप्तिसिद्धये प्रतीयमानाविद्यकसकलप्रपंचजातस्य ब्रह्मण्यध्
यारोपापवादपुरस्सरं सविस्तरं निष्प्रपंचत्वं प्रतिपाद्य तत्साधनं च श्रवणादिकं
सप्रपंचमभिधाय तस्यैवाधिकारिणस्तत्त्वमस्यादिवाक्यश्रवणानंतरं ब्रह्मात्मै
कत्वसाक्षात्कारेण निरस्तसमस्तभेदबुद्धेर्जीवन्मुक्तत्वं प्रदर्शितं एतावतैव
कार्यसिद्धेः किं बहुलेखनेनेति मनसि निधाय संप्रत्यस्यैव जीवन्मुक्तस्य प्र
काशात्मानंदानुभवकं निरस्तस्य सेत्स्यतीत्यभावेऽपि अविद्यालेशवशात्प्रार
ब्धं कर्म भुंजानो भिक्षाटनादिदेहयात्राणाचक्रियावशिष्टो ब्रह्मीभूत एवावतिष्ठ

५६ तेन रूपसंहरति॥ किं बहुनेत्यादिना॥ अयं देहयात्रामात्रार्थमिच्छानिच्छापरेच्छाप्रा
पितानि सुखदुःखलक्षणान्यारब्धफलान्यनुभवन्नंतःकरणाभासादीनामवभा
सकः सन्तदवसाने प्रत्यगानंदपरब्रह्मणि प्राणे लीने सति अज्ञानतत्कार्यसं
स्काराणामपि विनाशात्परमकैवल्यमानंदैकरसमखिलभेदप्रतिभासरहि
तमखंडब्रह्मावतिष्ठते प्रारब्धं त्रिविधं स्वेच्छाकृतं बलात्कारेणादि समाध्यवस्था
यां शिष्यादिभिर्दृश्यमानमन्नादिकं परेच्छाकृतं समाध्यवस्थायां व्युत्थानं
दशायां वा आकाशफलवात्तवदकस्मात्जायमानं पाषाणपतनकंटकवेधा
दिकमनिच्छाकृतं स चायं जीवन्मुक्तः प्रोक्तं त्रिविधप्रारब्धप्रापितं सुखदुः ५६
५५ खमनुभवन्बुध्यादिसाक्षितया सर्वावभासकः सन्भोगेनारब्धे कर्मक्षये स
ति प्रत्यगभिन्नपरमात्मनि प्राणादिलयानंतरं भ्रष्टाविधकसंसारः कृतकृत्यः

सन्नालितसकलभेदप्रतिभासो ब्रह्मैवावतिष्ठते इति सकलवेदरहस्यतात्पर्यमित्यर्थः
बुध्या२ अयं जीवन्मुक्तो देहाद्युपाधिविलये सति घटाद्युपाधिविनिर्मुक्ताकाशवन्मुक्त इत्युपचा
रव्यवहारभाग्भवति बद्धत्वस्याप्यवास्तवत्वात्॥ ॥तदुक्तमाचार्यैः॥ ॥न निरोधो न
चोत्पत्तिर्न बंधो न च साधकः। न मुमुक्षुर्न वा मुक्त इत्येषा परमार्थता॥ ॥अस्य जी
वन्मुक्तस्य उपाधिविगमसमये प्राणादयो लिंगशरीरमतितप्तलोहक्षिप्तनीरबिं
दुवत्प्रत्यगभिन्नपरमानंदे लीनत्वात्स्थूलशरीरं नोत्तिष्ठतीति॥ अत्र श्रुति
माह॥ न तस्य प्राणा उत्क्रामंत्यत्रैव समवलीयंते विमुक्तश्च विमुच्यते इत्यादि श्रु
तेः॥ अयं जीवन्मुक्तो जीवन्नेव दृश्यमानाज्ञानद्वयादिबंधनादिदोषेण मुक्तो
वर्तमानदेहपाते सति सर्वदेहबंधादिदोषेण मुच्यत इत्यत्रापि श्रुतिमाह॥
विमुक्तश्चेति॥ बृहदारण्यकेऽपि यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि श्रिताः॥

वे॰ अथमर्त्योमृतोभवत्यत्रब्रह्मसमश्नुतइति॥बाधितेपिजीवन्मुक्तपदंस्फुरत्वाच्च
५७ देहेकालसात्कृते। भजत्यदेहमुक्तत्वंपवनोस्पंदनामिव॥ असंगाद्यर्थंपुरु
षआकाशवत्सर्वगतश्चनित्यः [illegible]
प्रत्यगात्मनोनित्यत्वपरिशुद्धत्वकूटस्थत्वश्रवणात्तदुत्पत्त्यादिविकारासं
स्कारश्चतुर्विधंक्रियाफलविलक्षणत्वेनविद्ययानित्यनिवृत्तविद्यानिवृत्तिमा
त्रेणप्राप्तस्वात्मापुनः॥प्राप्तइत्युपचर्यते॥अधिष्ठानस्यगमनाभावेऽध्य
स्तस्यलोकांतरगमनायोगान्नसालोक्यादिमुक्तिसंभवः॥नन्वप्राप्तस्य
क्रियासाध्यस्यवस्तुनोविद्यमानानर्थनिवृत्तेश्चपुरुषार्थत्वंदृष्टं॥अत्र ५७
तदभावात्कथंपुरुषार्थत्वमितिचेन्न॥तयोरेवपुरुषार्थत्वमितिनियमाभा
वात्स्वच्छायायामारोपितरक्षसोविस्मृतकंठगतचामीकरस्यभ्रांतपुरुषस्या

प्तवाक्येनतयोर्निवृत्त्यासोरपिपुरुषार्थत्वदृष्टेः अत्रसंग्रहः।आत्माज्ञानमलंनि
रस्तममलंप्राप्तंवतत्त्वंपरं।कंठस्थाभरणादिवद्भ्रमवशाच्छायापिशाचीयथा॥ ५८
आप्तोक्त्याप्तिनिवृत्तिवच्छ्रुतिशिरोवाक्याद्गुरोरुत्थितात्स्वध्वांतनिरासनः।प
रसुखंप्राप्तंतयोरुच्यते॥ ॥नचमुक्तानामपिवसिष्ठभीष्मप्रभृतीनामपरोक्ष
ज्ञानिनांपुनर्देहांतश्रवणात्केवलंज्ञानोत्पत्तिसमसमयएवात्मज्ञानाना
मस्माकंमुक्तिर्भवतीतिकथंविश्वासिमः अतोज्ञानव्यतिरिक्तमप्युपायांतरं
किंचित्कर्तव्यमितिवाच्यं॥शास्त्रप्रामाण्यादेवतदुपपत्तेः॥ब्रह्मवेदब्रह्मैवभ
वति॥तरतिशोकमात्मविदित्यादिश्रुतिभि [illegible]
तिपादनात॥तदुक्तंशेषेण।तीर्थेश्वपचगृहेवानष्टस्मृतिरपिप
रित्यजन्देहंज्ञानसमकालमुक्तः॥कैवल्यंयातिहतशोकइतिवसिष्ठादीनांत्वा

धिकारिकपुरुषत्वेनयावदधिकारंप्रारब्धवेगप्रयुक्तप्रपादिनाप्ती कृतावांतरदेह
५८ पातेपितदेहभाविसोगस्यनिवारयितुमशक्यत्वात्प्रारब्धस्यविनाभोगेनक्षया
नुपपत्तेः [illegible] त
[illegible] दीनांप्रारब्धकर्मणोनेकदेहारंभकत्वसंभवेपिचरमदेहं विनाप्य
[illegible] ज्ञानोत्पत्तेरसंभवात् । वामदेवेतथादृष्टत्वात् । अन्यथागर्भस्यपिश्रवणाद्युत्थेन
ज्ञानात्पत्त्यनुपपत्तेः । ननुज्ञानिनामपिस्वप्नावस्थायांदेहांतरस्वीकारदर्शनात्तामपि ५
पुनर्देहांतरस्वीकारः । किंनस्यादितिचेन्न । कंमेस्वप्नेसमाविशदित्यादिवाक्येषुकं
ठान्निर्गमनाभावश्रवणात्देहांतरप्राप्तेस्तत्रैवतदंतरप्रतिपत्ताविरत्यत्रदेहान्निर्ग ५८
मनश्रवणाद्वैषम्यं ॥ ॥तदुक्तंस्कांदे॥यस्मिन्देहेदृढंज्ञानमपरोक्षंविजायते।
तद्देहपातपर्यंतमेवसंसारदर्शनं ॥ १ ॥ पुरापिनास्तिसंसारदर्शनंपरमार्थतः ॥

५९ कथंतद्दर्शनंदेहविनाशादूर्ध्वमुच्यते । २ ॥ तस्माद्ब्रह्मात्मविज्ञानंदृढंचरमविग्र
हे । जायतेमुक्तिदंज्ञानंप्रसादादेवमुच्यतइति । तस्मात्स्थूलंविमुक्तश्चमुच्य
तइति । नित्यशुद्धपरिपूर्णमद्वयंसच्चिदानंदात्मकमखंडमक्षरंसर्वदासुख
मबोधतत्कृतेर्वर्जितंसदहमस्मितत्परं ॥ १ ॥ गोवर्धनप्रेरणयाविमुक्तक्षेत्रे
प[illegible]नरसिंहयोगी॥वेदांतसारस्यचकारटीकांसुबोधिनींविश्वपतेःपुरस्ता
त् ॥ [illegible] ॥ जातेपंचशताधिकेदशशतेसंवत्सराणांपुनःसंजातेदशवत्सरे[illegible]
॥ इतिनृसिंहसरस्वतीविरचितावेदांतसारटीकासंपूर्णा ॥ ॥ [illegible] ॥ ॥ [illegible] ॥ ॥ ५९
[illegible]पौषमासेपंचम्यांबुधवासरे ॥ [illegible] टीकानाम्ना
सुबोधिनीमिमां ॥ १ ॥ ॥ छ ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ श्रीशुभंभवतु ॥

इदंपुस्तकंरघुनाथेनलिखित्वाविशुद्धचेतसेकेळकरोपाह्वश्रीकृष्णायहस्तेदत्तवान्